ॐ श्रीगणेशाय नमः ॥ ॐ गुणकारणे नृसिंहैकनाम सिंहो विराजते यन्नादतः पलायंते महाक
ल्मषकुंजराः १ विसर्गे संभवान् जीवान् स्वमर्यादासु संस्थितान् विसृष्टः पात्यखिलैर्रूपैरित्येवं पंच
मे स्थितं २ अध्यायैकोनविंशत्या षष्ठे पोषणमुच्यते श्रुतिलंघितमर्यादभक्तरक्षणलक्षणं ।
अजामिलो मनुष्येषु महापापो यथाऽवितः विश्वरूपादियानीचनयादेवेषु वासवः ॥४॥ अजामिल
स्य भक्तस्य विस्मृते निरूपितं संकेतभगवन्नामग्रहणेहानुषंगजो ॥५॥ वृत्रोपि भगवद्भक्तस्त्वेनो
पेंद्रसेवकः तद्योन स्वैश्वर्यं शत्रुनिर्जयमीवितः ॥६॥ तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते ॥ वि
श्वरूपकथाः षड्भिर्द्वितीयोध्यायेततः ॥७॥ इंद्रस्येव तद्दोषेनेरहृष्ठाख्यानेनततो ष्टभिः ॥ द्वाभ्यांच म
रुजोत्पत्तिः । निवृत्तिमार्गः कश्चित्तत्रादौ भगवता यथा क्रमयोगोपलब्धेन ब्रह्मणापदसंसृतिः
१ यद्वृत्तिलक्षणं श्रेयस्त्रैगुण्यविषयो मतः योसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥२॥

मरुदाख्यानमेवं प्रकरणक्रमः ८ तत्रादौ प्रथमे विस्तोर्हृतैः पातकिमोचने तत्पापख्यापनायोक्त ।
यामोर्धर्मादिलक्षणं ९ अथ षष्ठस्कंधे व्याख्यायते पूर्वोक्तानुवादपूर्वकं निरंतरोक्तनरकपरि ।
हारोपायं पृच्छति निवृत्तमार्गः ऋषिभिः आदौ द्वितीयस्कंधे वैश्वानरं याति इत्यादिना भगवता यथा
यथावत्तत्यत्नेन मार्गेण क्रमेण योगो विरंचिप्राप्तिः ततोपलब्धब्रह्मज्ञानेन सह ब्रह्मसंसृतिर्मोक्षो
भवति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमिति वचनात् १
त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्यं यस्य न लीना प्रकृतिर्यस्य तस्य गुणसर्गः पुनः पुनः गर्भसर्गः
भोगार्थं देहारंभरूपो मार्गः स च कथितः त्रमी येटक्षिणेन पथाऽर्यमणः पितृलोकं व्रजेति इत्या

टीका ६ १

अनुवर्णिताः निरंतराख्यायाख्याताः चतुर्थस्याद्दौ यतः यस्मिन् ३ द्वीपादीन् भागतो लक्ष
णतो मानतश्च पुरामेरुत्समे संस्थाने ज्योतिषां विवराणां च दं संस्थाने विधयेथाः स्रजत्तथा
व्याख्यातमित्यर्थः ४ नानाउग्रयातनान्नायेषु तान् नरकान् यथा येनोपायेन नरयातनाच्छेत्
तन्मे अथ पुनर्व्याख्यातुमर्हसि ५ तत्र तावन्मनःप्रायश्चित्तं विना नरकाद् निर्गाराऽन्या
हनचेहदित्तिद्वाभ्याम् अनुतिपातिभिर्मनो वाक्कायैः कृतस्यांहसः नैरैव इहैवापचितिं प्रायश्चि

अधर्मलक्षणा नानानरकाश्चानुवर्णिताः मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः प्रि
यव्रतोत्तानपदोर्वंशः तच्चरितानि च ३ द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् धरामंडल
संस्थानं भागलक्षणमानतः ज्योतिषां विवराणां च यथेदमसृजद्विभुः ४ अधुनेह महा
भाग यथैव नरकान्नरः नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ५ ॥ श्रीशुक उवाच ॥ न चे
दिहैवापचितिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ध्रुवं स वै प्रेत्य नरकानुपैति
ये कीर्तिता मे भवतस्तिग्मयातनाः ६ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविप

तेन कुर्यात् चेत् तर्हि ध्रुवं प्रेत्य नरकान् ध्रुवं समुपैति ये मया भवतः कीर्तिताः तिग्मा दारु
णा यातना येषु तान् ६ यस्मादेवं तस्मात्पापस्य प्रायश्चित्ते न कदाचन मृत्योः पुरैव आश्विह विप
द्यता अम्रियमाणेनात्मना देहेन यत्नः अविपन्नविपत्तिरहितो यावत् नाम ना यते न मनसा
तेना व्याप्य च अन्यथा अनतीव चिरकालेन हि दोषाणां व्रतमहेतीति हेतुणोपायेनः तत्र च पापस्य महत्त्व
मल्पत्वं वा वेद्य तत्तदनुरूपं प्रायश्चित्तं यतेत ननु जारोगाणां निदानं विद्या वैद्यः तदनुरूपं वि

अत्र चोदयति द्वाभ्यां दृष्टेति राजदण्डादिश्रुतेन नरकपातादिना ताभ्यां यात्मनः पापमहितं जानन्नपि
भूयः प्रायश्चित्तं न करोति अथो अतः कारणात् द्वादशाब्दादिकं प्रायश्चित्तं तेन समूलस्य दोष
स्यानिवृत्तेर्निवृत्तौ वा पुनरप्यपापप्ररोहायोगादिति भावः ९ किंच क्वचित् कदाचिदभद्रात्पापा
न्निवर्तते क्वचित्तदेव पुनराचरति यथा कुञ्जरः स्नातोऽपि रजोभिरात्मानं मलिनीकरोति ता
यापापस्य पुनर्दुर्निवारत्वेन नरकपातस्यावश्यंभावित्वात् प्रायश्चित्तमपार्थमिति १० परिह

राजोवाच॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं करोति भूयो विवशः प्रायश्चित्तमथो कथं ९ क्वचिन्निवर्ततेऽभद्रात्क्वचिच्चरति तत्पुनः प्रायश्चित्तमथोऽपार्थं मन्ये कुञ्जरशौचवत् १०॥ श्रीबादरायणिरुवाच॥ कर्मणा कर्मनिर्हारो न ह्यात्यन्तिक इष्यते अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं ११ नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवन्ति हि
एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते १२

रति कर्मणेति कृच्छ्रादिप्रायश्चित्तेन कर्मणा पापस्य निर्हारो नाशः आत्यन्तिकः समूलो न हीष्य
तेऽविद्वानधिकारी यस्मिंस्तत्तस्य भावः तत्त्वं तस्मात् अतो विद्याया नाशाभावात् तद्देऽपि नास्मि
न्यायेन संस्कारेण पापान्तरस्य पुनः पुनः प्ररोहो भवत्येव किं तर्हि मुख्यं प्रायश्चित्तं तत्राह प्रा
यश्चित्तं तु विमर्शनं ज्ञानं ११ तत्र नित्यमश्नतः शनैर्लभते नान्यदिति सदृष्टान्तमाह नेति
पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधन्ते तथा नियमादिकर्ता क्षेमाय न तत्त्वज्ञा

द

पजदेवविशयतिद्वाभ्यां तपसा ऐकाग्र्येण मनस इन्द्रियाणां च ऐकाग्र्यं परमं तप इति स्मृतेः ब्रह्मचर्येणाष्टां
गेन तेङ्कं स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एत
न्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति शमो मनसो नियमनं
दमो बाह्येन्द्रियाणां त्यागो दानं यमोऽहिंसादिः नियमो जपादिः १३ १४ अस्मातिङ्ःकारत्वात्तस्माप्युत्तमे
वान्यप्रायश्चित्तमाह केचिदिति नन्वेवं सन्नाम भक्तिप्रधाना विरलाः इति दर्शयति केवलया तपआदि
निरपेक्षया वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् किं तन्येषामश्रद्धयानत्राप्रवृत्तेरणो

तपसा ब्रह्मचर्येण शमेन च दमेन च त्यागेन सत्यशौचाभ्यां यमेन नियमेन च १३ देहवाग्बुद्धि
जं धीरा धर्मज्ञाः श्रद्धयान्विताः क्षिपन्त्यघं महदपि वेणुगुल्ममिवानलः १४ केचित्केवल
या भक्त्या वासुदेवपरायणाः अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः १५ न तथा ह्यघवा
न्राजन्पूयेत तपआदिभिः यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया १६ सध्रीचीनो ह्य
यं लोके पन्थाः क्षेमोऽकुतोभयः सुशीलाः साधवो यत्र नारायणपरायणाः १७ प्रायश्चित्ता
नि चीर्णानि नारायणपराङ्मुखं न निष्पुनन्ति राजेन्द्र सुराकुम्भमिवापगाः १८

तेष्वेव पर्यवसानात् दृष्टं गदमात्रं १५ एतच्च ज्ञानमात्रात् दुर्निग्रहमित्याह न तथेति पूयेत शुद्ध्येत तत्पु
रुषनिषेवया कृष्णार्पिताः प्राणा येन १६ तत्र हेतुः सध्रीचीनः समीचीनः अयं पन्था भक्तिमार्गः य
तः क्षेमः क्षेमत्वे हेतुः न कुतश्चिन्नविघ्नादेर्भयं यस्मिन् तदेवाह सुशीलाः कृपालवः साधवो नि
ष्कामाः यत्र धर्मनिष्ठाः अतो न ज्ञानमार्गवदसहायता निमित्तं भयं नापि कर्ममार्गवन्मत्सरादि
युक्तेभ्यो भयमिति भावः १७ भक्तेरन्यनिरपेक्षत्वमुक्तं कृच्छ्रादीनि तत्त्वनयोपधयतीत्याह प्राय

भक्तिः स्वल्पापि पुनात्येवेत्याह । तस्य गुणेषु रागमात्रमस्ति न तु ज्ञानं यस्य तन्मनः तावतैव चीर्णानि
ष्कृतं प्रायश्चित्तं यैः १९ इममर्थमितिहासेनोपपादयति अत्र चेति मे मत्तः २० कान्यकुब्जपुरे दा
स्याः पतिर्नाम्नाजामिलः २१ वंदीग्रहेणाक्षैश्च द्यूतेन कैतवैर्वंचनादिभिश्चौर्यैर्जीविकां वृत्तिं वि

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह न ते यमं पाशभृतश्च तद्भटान् स्व
प्नेपि पश्यंति हि चीर्णनिष्कृताः १९ अत्र चोदाहरंतीममितिहासं पुरातनं दूतानां विष्णु
यमयोः संवादस्तं निबोध मे २० कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः नाम्ना नष्ट
सदाचारो दास्याः संसर्गदूषितः २१ बंद्यक्षैः कैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः बिभ्रत्कुटुं
बमशुचिर्यातयामास देहिनः २२ एवं निवसतस्तस्य लालयानस्य तत्सुतान् कालोऽ
त्यगान्महान् राजन्नष्टाशीत्यायुषः समाः २३ तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः बा
लो नारायणो नाम्ना पित्रोश्च दयितो भृशं २४ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ।
निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं २५ भुंजानः प्रपिबन् खादन् बालकं स्नेहयंत्रि
तः भोजयन् पाययन् मूढो न वेदागतमंतकं २६ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते

भ्रत् पुत्रान् यातयामास पीडयामास २२ आयुषः संबंधी महान् कालोऽत्यगात् सकियानित्यपेक्षाया
माह अष्टाशीत्या संख्याया युक्ताः समाः संवत्सराः ३२ प्रवयसः वृद्धस्य २४ बद्धं हृदयं येन जरठो
वृद्धः २५ एतच्च तदुपलालनादि श्रीनारायणनामोपचारमाहात्म्येन तद्भक्तिरेवाभूदिति सि॥

वक्राणि तुंडानि मुखानि येषां ऊर्ध्वानि रोमाणि येषां तान् २८ प्लावितेन प्लुततां नीतेन २९ हरि
कीर्तने निशम्याकर्ण्य अयं तत्त्वं गृहीतं नाम ३० पुरःसराः अग्रगाः ३२ कस्य वा यूयं निषेधथ ३३ वयं
पुण्यात्र ज्ञानीम इति न कोपः कार्यः यतो लौकिका इति तत्त्वमेव यमित्याहुः सर्वे इति सार्धेन द्वा
भ्यां लसंत्यः पुष्करमालाः संति येषां ३४ नूत्नं नवं वयो येषां निषंगास्तूणिः धनुर्निषंगादि

सपाशहस्तांस्त्रीन्दृष्ट्वा पुरुषानतिदारुणान् वक्रतुंडानूर्ध्वरोम्ण आत्मानं नेतुमागतान्
२८ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयं प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः २९ वि
निशम्य म्रियमाणस्य मुखतो हरिकीर्तनं भर्तुर्नाम महाराज पार्षदाः सहसापतन् ३० वि
कर्षतोंतर्हृदयाद्दासीपतिमजामिलं यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ३१ ऊचु
र्निषेधितास्तांस्ते वैवस्वतपुरःसराः के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ३२ कस्य वा कुत
आयाताः कस्मादस्य निषेधथ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ३३ सर्वे पद्मपलाशा
क्षाः पीतकौशेयवाससः किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ३४ सर्वे च नूत्नवा
यसः सर्वे चारुचतुर्भुजाः धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः दिशो वितिमिरालोकाः
कुर्वंतः स्वेन तेजसा ३५ किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ३६ ॥श्रीशुक उवाच॥ इ
त्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ३७

भिः श्रीः शोभा येषां ते वितिमिर आलोकः प्रकाशो यासु तथाभूता दिशः कुर्वंतः ३५
भवतामेतन्नुचितमित्याहुः किमर्थमिति ३६ यदा स्मादिजानन्मत्वा एते घोरा एवास्मा
द्या यमराजस्य किंकराः त्वन्यन्न वदतो इति विस्मयेन प्रहस्य ताः प्रत्यूचुः मेघस्येव निर्ह्रादो यस्या नि

कथं स्विन्न केन प्रकारेण ध्यानं विषयः कारिणः न्नणामिति नारायणपश्चादयः तेष्वपि कति विदेवे
त्यर्थः २९ वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः अनेन वेदप्रमाणको यो धर्मः स
धर्मः वेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तं यथाह जैमिनिः चोदनालक्षणोऽर्थो धर्म इति व्याख्या
नं च भट्टैः द्वयमेकेन सूत्रेण शक्यं धर्मं नाप्यानिरूपणं इति अयं स्यायधर्मस्यार्थः स्वरूपलक्षणं चद।
दुध्यानकथनायाहुः तद्धि पर्ययः यो वेदनिषिद्धः सोऽधर्मः निषेधप्रमाणमित्यर्थः वेद
सप्रमाणो हेतुः वेदो नारायण इत्युक्तः सएव साक्षादित्युपचारः स्वयंभूरिति वचनैः ध्यानसमाचे

कथं स्विद्भ्रियते देहः किं वास्य स्थानमीप्सितं देहाः किंकारिणः सर्वे आहोस्वित्कति विद्र।
णं ३० ॥यमहंताक्रतुः॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः वेदो नारायणः साक्षात्स्व
यंभूरिति शुश्रुम ३१ येन स्वधाम्न्यमी भावा रजःसत्वतमोमयाः गुणनामक्रियारूपैर्विभा
व्यंते यथातथं ३२ सूर्योऽग्निः खं मरुद्देवः सोमः संध्याऽहनी दिशः कं कुः कालो धर्म इति
ह्येते दैह्यस्य साक्षिणः ३३ णः स्वयमेव भवतीति तथा च श्रुतिः अस्य
महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इति ३४ कोसौ नारायणः तत्राहुः येन स्वधाम्नि स्वस्व
रूपे अमी भावाः प्राणिनः गुणाः प्रानवादयः नामानि ब्राह्मण इत्यादीनि क्रियाध्ययनाद्याः
रूपाणि वर्णाश्रमादयः तैर्विभाव्यंते विविच्यंते यथातथं यथावत्स नारायणः ३५ तथाप्यः प
र्मोः तेन कृत इति कृतो वा ज्ञायते तत्राहुः सूर्य इति अहनी अहश्च रात्रिश्च कं उदकं कुः पृथ्वी देह्य
स्य जीवस्य यथाहुः आदित्यचंद्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च अहश्च रात्रिश्च

स्थानमाहुः एतैर्निमित्तभूतैर्विज्ञातः देशानाहुः सर्वं इति ५२ विपरीतानि अभद्राण्यपि कर्मिणां सं
भवंति यतस्तेषां गुणसंयोगोऽस्ति यदिह किंचित्सुकृतं कर्तास्यात् तत्र हि तस्याभद्राणि न स्युः ननु तेन तदस्त्वित्या
हुः नहि देहवान् अकर्मकृद् अस्तीति अतः सर्वे कर्मिणः कर्मिणां च पापस्यावश्यंभावित्वात् ते सर्वे दं
डमर्हंतीत्यर्थः ५४ कथं स्विन्न ह्रियते दंडः अत्यसो नरः येनेति पर्यावर्तितेत्याह अथ मानसारेण दंडो
पर्यनुसारेणास्त्ववदित्यर्थः ५५ न केवलं स्वपापराधपक्वाः विनश्यंति परितोऽन्याहुः यथो
ति देहेवप्रवराः इहजन्मनि प्राणतो रसन्तोऽन्येनवासाविहः स्थितिमिश्रत्वेन वा धार्मिकत्वादिना वा त्रैविध्यं

एतैरधर्मोभिज्ञातः स्थानं दंडस्य युज्यते सर्वे कर्मानुरोधेन दंडमर्हंति कारिणः ५३ संभवंति
हि भद्राणि विपरीतानि चानघाः कारिणाम् आगसंगोऽस्ति देहवान्नैष्यकर्मकृत् ५४ येन याव
न यथा धर्मोऽधर्मो वेह समीहितः स एव तत्फलं भुंक्ते तथा तावदृशं तत्रैव ५५ यथोहदेवप्रवराः
त्रैविध्यमुपलभ्यते अजेषु गुणवैचित्र्यात् तथान्यत्रानुमीयते ५६ वर्तमानोऽन्ययोः काला
लो गुणाभिज्ञापको यथा एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनं ५७ मनसैव पुरे देवः पू
र्वरूपं विपश्यति अनुमीमांसते पूर्वं मनसा भगवानजः ५८

अजेषु यथोपलभ्यते तथान्यत्र जन्मांतरेनुमीयते त्रैविध्यान्यथानुपपत्त्या कल्प्यते ५६ वर्तमान
जन्मना पूर्वापरजन्मनोः धर्माधर्मज्ञानं भवतीति स दृष्टांतमाहुः वर्तमानो वसंतादिकालः अन्ययोर्भूत
भविष्यतोर्वसंतयोर्ये गुणाः पुष्पफलादयः तेषामभिज्ञापको यथा एवमेतज्जन्मान्ययोर्भूता
भाविजन्मनोर्धर्माधर्मनिदर्शयतीति तथा ५७ अयं च धर्माधर्मज्ञानप्रकारोन्येषां पुमर्थिजस्तु मन
सैव सर्वं पश्यतीत्याहुः पुरे संयमिन्यां स्थित एव देवो यमः देहे स्थितो नर्यामी वा जीवस्य पूर्वरू

पं धर्माधर्मादिगुणं विशेषेण पश्यति अनु अनंतरम् पूर्वरूपमी

मांसते यथान्नरूपं अनंतरं विचारयति यतोसौ भगवानजः ५८

भा॰ष॰ जीवस्त्वीश्वरेणोत्थापितं वर्तमानं देहं प्राप्नोति न तु पूर्वमपरं चेत्याहुः यथेति अतः अविद्योपाधिर्जी
५ वस्तत्व्यक्तमेव प्राचीनकर्मोद्भिन्नं वर्तमानमेव देहाध्यासेनाहमिति मन्यते पूर्वमपरं वा न वेद अ
त्र हेतुः न ह्याजन्मनो स्मृतिर्यस्य अत्र दृष्टान्तः तमसा निद्रया पुरुषो यथा स्वप्ने भिन्नं व्यक्तमेव देहाध्यासेन
न तु जाग्रद्देहादि पूर्वं स्वप्नादिगतं न वा तद्वदित्यर्थः ४९ एवं मूढस्य जीवस्य संसारं प्रपंचयति पंचभिः १
श्लोकैः पंचभिः कर्मेन्द्रियैः स्वार्थान् पादादानादीन् पंच ज्ञानादीन् वेद पंचभिर्ज्ञानेन्द्रियैः षोडशेन मनसा
ध्रं सह स्वप्नदृष्टः षोडशेन [illegible]त्रिवृता सोपि स्वयं त्वेक एव सर्वेन्द्रियविषयप्रतिसंधानात् ज्ञानकर्मेन्द्रियज्ञा

यथा तत्त्वमसा पुरुषः उपास्ते व्यक्तमेव हि न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ४९ पंचभिः
कुरुते स्वार्थान् पंच वेदाथ पंचभिः एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ५० तदेतत् षो
डशकलं लिंगं शक्तित्रयं महत् धत्तेनुसंसृतिं पुंसि हर्षशोकभयार्तिदा ५१ देह्यज्ञोऽजितष
ड्वर्गो नेहेत कर्म कर्हिचित् कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति ५२ न हि कश्चि
त्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ५३ लब्ध्वा नि
मित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत यथा योनि यथा बीजं स्वभावेन बलीयसा ५४ ॥

नेन्द्रियमनोविषयान् प्राप्नोति ५० तदेतल्लिंगं शरीरं शक्तित्रयं गुणत्रयकार्यं महत्तत्त्वादि पुंसि जीवे अ१
नुसंसृतिं धत्ते ५१ नेहेत अविद्वान् अपि अनेनैव कर्मणा कार्यते कोशकारः कीटविशेषः मुह्यति नि१
र्गमोपायं न जानाति ५२ कार्यत इत्यत्रानुभवं प्रमाणयति न हीति गुणैर्गुणकार्यैः रागादिभिः स्वाभा
विकैः पूर्वकर्मसंस्कारोद्भूतैः ५३ कर्मवशेन च तत् तत् रूपो देहो भवतीत्याह लब्ध्वेति अव्यक्तमदृ
ष्टं निमित्तं लब्ध्वा व्यक्तात् व्यक्तं तत्तद्रूपं स्थूलसूक्ष्मं च शरीरं भवति यथा योनि मातृसदृशं यथा

बीजं पितृसदृशं स्वभावो वासना शुक्रशोणितयोरेकत्वेपि कर्म
वासनया मातृपितृसदृशो देहो भवतीत्यर्थः ५४

संसारचक्रस्य संहरतो मुक्तिप्रकारमाह॥ एवं स्थितिं गुणसंगात परमेश्वरभजनात ५५ ततेवं साम्या।
न्यतो यमो ऽतिनिर्णयमुक्ता प्रस्तुतस्याजामिलस्याथ मे प्रपंचयतो देस तमाह॥ अयं हीति यावदध्या
यसमाप्तिः तत्र ह्याभ्यां तत्पूर्ववृत्तां नानवादोः न्यायानिरेकप्रदर्शनार्थः शीलं स्वभावः वृत्तं सदा
चारः गुणाः शमादयः तेषामालयः ५६ निरहंकृतो निरहंकारः ५७ आवृतः वनात्परावृतः ५८

एवं प्रकृतिसंगेन पुरुषस्य विपर्ययः आसीत्स एव न चिरादीशसंगाद्विलीयते ५५ अयं हि।
श्रुतसंपन्नः शीलवृत्तगुणालयः धृतव्रतो मृदुर्दान्तः सत्यवान्मन्त्रविच्छुचिः ५६ गुर्वग्न्यति।
थिवृद्धानां शुश्रूषुर्निरहंकृतः सर्वभूतसुहृत्साधुर्मितवागनसूयकः ५७ एकदासौ वनं यातः
पितृसंदेशकृद्द्विजः आदाय तत आवृतः फलपुष्पसमित्कुशान् ५८ ददर्श कामिनं कंचि
च्छूद्रं सह भुजिष्यया पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ५९ मत्तया विश्लथन्नीव्या व्य।
पेतं निरपत्रपं क्रीडन्तमनुगायन्तं हसन्तमनयान्तिके ६० दृष्ट्वा तां कामलिप्तेन बाहुना परिरं
भितां जगाम हृच्छयवशं सहसैव विमोहितः ६१ स्तंभयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतं।
न शशाक समाधातुं मनो मदनवेपितं ६२ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः तां मे

भुजिष्यया दास्या मैरेयं मधु पीत्वा स्तां पीत्वा मदेनाघूर्णिते नेत्रे यस्याः ५९ विशेषे
ण श्लथन्ती नीवी यस्याः तथा सह व्यपेतेत्र्वाचारान् भ्रष्टं ६० कामो हृच्छयकेनेतदंगरागेण हरिद्रादि
नालिप्तेन ६१ सत्त्वं धैर्यं श्रुतं ज्ञानं तद्बलेन स्तंभयत्रपि मदनेन कंपितं मनः समाधातुं न शशाकोः अ
न ६२ तद्दर्शनमेव निमित्तं यस्य स्मरस्य व्याजस्य ग्रहस्य तेन ग्रस्तः विचेतनो गतस्मृतिः ६३

म

भा॰ष॰
६

यावता समग्रेण ६४ लंभितां परिणीतां ६५ ६६ अघायुरूपमार्यस्य मवमेव तदीयमन्त्रादिकमशुचित्तिमा-
लात् ६७ अकृतनिर्वेशं अकृतप्रायश्चित्तं अस्यैव वहितार्थं तेष्याम इत्याहुः यत्रेति ६८ ॥इति भा-
वार्थदीपिकायां षष्ठस्कंधे प्रथमोध्यायः ॥१॥ द्वितीये वैरभवैर्यादूता नाममाहात्म्यमद्भुतं श्राव-
यित्वा द्विजो विष्णो लोकं नीतः स्तूयते नयकोविदाः न्यायनिपुणाः १ धर्मदृशां सभामधर्मः स्पृश-

तामेव तोषयामास पित्र्येणार्थेन यावता ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ६४ वि-
प्रां स्वभार्यामप्रौढां कुले महति लंभितां विससर्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ६५ यत-
स्ततश्चोपनिन्ये न्यायतोन्यायतो धनं बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ६६ यदसौ
शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः अवर्तत चिरं कालमघायुरशुचिर्मलात् ६७ तत ए-
नं दंडपाणेः सकाशं कृतकिल्बिषं नेष्यामोकृतनिर्वेशं यत्र दंडेन शुद्ध्यति ६८ ॥इति श्रीभा-
गवते षष्ठस्कंधे प्रथमोध्यायः ॥१॥ बादरायणिरुवाच एवं ते भगवद्दूता यमदूताभिभाषितं
उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः १ ॥विष्णुदूता ऊचुः॥ अहो कष्टं धर्मदृशामधर्मः
स्पृशते सभां यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा २ प्रजानां पितरो ये च शास्तारः साधवः
समाः यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ३ यद्यदाचरति श्रेयानितरस्तत्तदीहते स
यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ४ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः स्वयं ध-

तीत्याह यत्र सभायां यैः धर्मदृग्भिः तेषां तां सभां २ पितरः पितृवत्पालकाः शास्तारः अनुशिक्षकाः
वैषम्यमदंड्यदंडनं ३ एतत्प्रवर्तिनमधर्मं मन्योपि करिष्यतीति महत्कष्टमापतितमित्याहुः यद्यदिति
श्रेयान्श्रेष्ठः ४ विष्णुस्तज्ञानादयीत्याहुः यस्येति द्वाभ्यां निर्वृतो निश्चिंतः ५ विश्वासेन नितराम

नन्वस्य पापिनो दंडे किमर्थं साक्रोशः क्रियते तत्राह । अयं ही प्रियपुत्रस्नान् विवशोपि हरेर्नाम व्याजहे
र उच्चारितवान् न केवलं प्रायश्चित्तमात्रं हरेर्नाम अपि तु स्वस्त्ययनं मोक्षसाधनमपि । सकृदुच्चारितये ।
न हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय गमनं प्रतीति स्मृतेः ७ ननु कर्मसाद्गुण्यकारं ह
रेर्नाम नित्ययुक्तं । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्यु
तमित्यादिवचनात् स्नानेनैवतत्र निवर्तकं हरेर्नाम कथं स्यात् तत्राह पतितेनैवेति स्वस्थो नः स्व
तुवतः मद्येवत शाहूवतस्त्पंयत स्वाश्रु निकृष्टैः आर्द्रपदम्भासमात्रं चतुरक्षरं यन्नाम तन्नारायणेति
नैव केवलेन चतुरक्षरमित्यनेनापि कांचटर्मिनि कथं जगाद नारायणायेत्याह यस्मात् छत्रत्यैव विक्रो

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ७ ए
तेनैव ह्यघोनोस्य कृतं स्यादघनिःकृतं यदा नारायणायेति जगाद चतुरक्षरं ८

पान्तरेण पुत्राह्वानेन अयं भावः कर्मान्तरेपि हरिनामग्रहः स्नानादिनाविवर्णं योगेश्वर्यकेन प्रायश्चि
त्तार्थं न युक्तमेव तथाहि अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः पुमान् विमुच्यते सद्यः सिं
हत्रस्तैर्मृगैरिवेत्यादिभिः पुराणेनाविसहस्रशो नाम्नः स्नानत्रयवगम्यते न चेति तौ वादार्थनिषे
कर्नीयविधिशेषत्वाभावात् नच विध्यश्रवणाद्स्तत्पशेषताकल्पनीया यद्यदाग्नेयो ष्टाकपालो
भवतीत्यादिवदर्थवादार्थत्वेन विधिकल्पनोपपत्तेः मन्त्रेषु च मनोअग्नये स्वाहेत्येवमादिना मंत्रेणा
हे विष्णोसो जानंतो नाम चिद्विविक्तनेत्यादिषु नाम्नस्त पोदानादि सर्वधर्माधि
क्यमवगम्यते उपपादिते च मंत्रार्थवादानामपि स्वार्थे प्रामाण्यं पदेव नाधिकरणे तस्मात् श्रीना

ननु कामकृतानां बहूनां महापातकानां सहस्रशः श्रावर्त्तितानां द्वादशाब्दादिकोटिभिरप्यनिवर्त्यो
नां कथमिदमेकमेव प्रायश्चित्तं स्यात् तत्राह स्तेन इति द्वाभ्यां ९ स निष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव
तत्र हेतुः यतो नामव्याहरणात् तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय
इति विष्णोर्मतिर्भवति ९ श्रेष्ठत्वमेवोपपादयति नेति द्वाभ्यां ब्रह्मवादिभिरुक्तैर्व्रतादिभिर्निःकृतैः
तथा न शुद्ध्यति उदाहृतैरुच्चारितैर्यन्नामपदैर्विष्णुनेत्तनमासीन्यादिक्रियायोगोऽपि नापेक्षित इति
दर्शितं किंच तन्नामपदोच्चारणं उत्तमश्लोकस्य गुणानां चोपलंभकं तापकं भवति न तत्कृच्छ्रं चा।

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहंता ये च पातकिनोऽपरे ९ सर्वे
षामप्यघवतामिदमेव सुनिष्कृतं नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः १० न निष्कृ
तैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान् व्रतादिभिः यथा हरेर्नामपदैरुदाहृतैस्तदु
त्तमश्लोकगुणोपलंभकं ११ नैकांतिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्प
थे तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः १२ अथैनं मापनयत कृ
ताशेषाघनिष्कृतिं यदसौ भगवन्नाम म्रियमाणः समग्रहीत् १३ ॥

प्रायश्चित्तादिवन्न पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ११ नैकांतिकं नात्यंतशोधकं तद्धि कृतेऽपि निष्कृतेऽप्यस्मिन्
कृतेऽपि असत्पथे पापमार्गे मनो धावति चेत् तत्कर्मणां पापानां निर्हारमात्यंतिकं नाशमिच्छतां हरेर्गु
णानुवाद एव प्रायश्चित्तं यतोऽसौ खलु सत्त्वभावनः चित्तशोधकः १२ अथ तस्मादेनं मापनयत यमार्गा।
णमानयत कृताशेषाघानां निष्कृतिं येन यद्यस्मात् समग्रहीत् संपूर्णमुच्चारितवान् ना
मैकदेशेनाप्यलमिति भावः म्रियमाण इत्यनेन पुनः पापांतरासंभव उक्तः नन्वतत्कालतमेव वि

८ [illegible] ५३

नन्वयं पुत्रनामाग्रहीन्न तु भगवन्नामेति तत्राहुः सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं परिहा-
सेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनेति सावज्ञमपि च वैकुंठनामोच्चार-
णं १४ ननु नायं संकल्पपूर्वकं वैकुंठनामाग्रहीत् किंतु पुत्रस्नेहपरवशः सन् तत्राहुः पति-
तः इत्यवशेनापि यो हरेः स यातनां नार्हति पुमानित्यनेन न जातिवर्णाश्रमादिनियमः उक्तं अ-
वशत्वमेवाह पतितः प्रासादादिभ्यः स्खलितो भग्नो भग्नगात्रः दष्टः सर्पादिभिः तप्तो ज्वरादि-

सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा वैकुंठनामग्रहणमशेषाघहरं विदुः १४ पति-
तः स्खलितो भग्नः संदष्टस्तप्त आहतः हरिरित्यवशेनाह पुमान्नार्हति यातनाः १५ गु-
रूणां च लघूनां च गुरूणि च लघूनि च प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः
१६

ना आहतो दंडादिना १५ ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं न त्वल्पं नामग्रहणमात्रं
पापतारतम्येन कृच्छ्रादितारतम्यवत् तत्राहुः द्वाभ्यां गुरूणां पापानां गुरूणि प्रायश्चित्तानि ल-
घूनां च लघूनि तारतम्येन ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यवस्था हरिनाम्नस्तु नैवं
व्यवस्था तस्य विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् न च स्वल्पविष्णुपाने महापा-
तकं तत्स्मरणावृत्तिर्नाम स्वल्पत्वात्प्रायश्चित्तस्मरणस्यायमतिभारः १६

भा॰ ष॰ ८

किंचैतैः तपोदानादिभिः तान्यघान्येव पूयंते नश्यंति अधर्मजातेन मलिनं तत्तस्य पापकर्तुर्हृदयं य
द्वा तेषामघानां हृदयस्थसंस्काराख्यं न शुध्यति तदपीशांघ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः
अयं भावः महांत्यपि पापानि सकृदुच्चारितेन नाम्ना नश्यंति सकृदावर्तितेन दीपेनेव गाढध्वां
तानि तदावृत्त्या तु पापांतरस्यानुत्पत्तिः दीपधारणादेव तमोंतरस्य तत्र वासनालयात् हृदयशुद्धिः
पत्तदर्थमेव तत्र तत्रावृत्तिविधानं पापक्षयश्च भवति स्मरणेन महर्निशमित्यादिषु तदेवात्रा।
श्रुतेरणानुवादः खलसत्वभावनः तदपीशांघ्रिसेवयेति च अतोस्य हरिनाम्नैव सर्वपापक्ष।

तैस्तान्यघानि पूयंते तपोदानजपादिभिः नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया १७ अज्ञा
नादथवाज्ञानादुत्तमश्लोकनामयत् संकीर्तितमघं पुंसो दहेदेधो यथानलः १८ यथाग
दं वीर्यतममुपयुक्तं यदृच्छया अजानतोप्यात्मगुणं कुर्यान्मंत्रोप्युदाहृतः १९

यः वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति १७ तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नो।
च्चारितमिति चेत्तत्राह अज्ञानादिति बालकेनाज्ञानादपि प्रक्षिप्तोग्निर्यथा काष्ठराशिं दहति
तद्वत् १८ नन्विदमपि पर्षदनपदिष्टं श्रद्धाहीनेन च कथं प्रायश्चित्तं स्यात् तत्राह यथेति अ
गदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तं यदृच्छया श्रद्धादिहीनेनाप्युपयुक्तं भक्षितं
पथ्येन्यत्वादजानतोपि स्वगुणमारोग्यं कुर्यात् मंत्रोपि नामात्मकः तथा स्वकार्यं कुर्यादेव नहि
वस्तुशक्तिः श्रद्धादिकमपेक्षत इत्यर्थः तदुक्तं विष्णुधर्मेषु हरिर्हरति पापानि दुष्टचित्तैरपि

६ स्कं [illegible] १८

तेविप्रममसम्बन्धमोचयामास्तुः १९ प्रत्युदिताः निराकृताः सेनः यानानागनायमराज्ञायपथ्यावत्सथ
यामास्तुः २० दर्शनेनोन्मवोयस्य २१ विवत्वंवकृमिक्लेन्नाना २२ त्रैविध्यंवेदत्रयप्रतिपाद्यंगुणा
श्चयंयमहत्तानांधर्मंकृत्सहतानांचभागवतंभगवत्प्रणीतंश्रुत्वंनिर्गुणंधर्मममाकर्णयेतियोज्यंभ

शुकउवाच ॥ तच्छ्रुत्वंविनिर्णीयधर्मभागवतेनरघ तेयाम्यपाशात्रिर्मुच्यविप्रंमत्योरस्मव
न् १९ इतिप्रत्युदिताया म्याहूतायानायमांतिके यमराजेयथासर्वमाचचत्ररिंदम २०
हिजः पाशाद्धिनिर्मुक्तोगतभीःप्रकृतिंगतः ववंदेशिरसाविलोः किंकरान्दर्शनोत्सवः
२१ तेवविवत्समभिप्रेत्यमहापुरुषकिंकराः सहसापश्यतस्तस्यतत्रांतर्दधिरेतद्य २२ अ
नामिलोप्यथाकर्ण्यहतानांयमकृत्स्नयोः धर्मंभागवतंश्रुत्वंत्रैविध्यंचगुणाश्रयं २३ भ
क्तिमान्भगवत्याशुमाहात्म्यश्रवणाद्धरेः अनुतापोमहानासीत्स्मरतोऽशुभमात्मनः २४
अहोमेपरमंकष्टमभूदविजितात्मनः येनविप्लाविनं ब्रह्मवृषल्यांजायतात्मना २५ धि
ङ्मांविगर्हितंसद्भिर्दुष्कृतंकुलकज्जलं हित्वाबालांसतींयोहंसुरापामसतीमगां २६ वृद्धा
वनाथौपितरौनान्यबंधूतपस्विनौ अहोमयाधुनात्यक्तावकृतज्ञेननीचवत् २७ सो

हमव्यक्तं पतिष्यामि नरके भृशदारुणे...

त्किमाताशीदित्युत्तरस्यानुषंगः २३ २४ अनुतापंप्रपंचयतिअहोइतिचतुर्भिः येनआत्मनामया ।
वृषल्यांप्रजनयता तापमानेनब्रह्मब्राह्मण्यंजातिः विप्लावितंनाशितं २५ दुष्कृतंदोषकर्तारं कु
लस्यकज्जलंकलंकं २६ नास्तिअन्योबंधुःपुत्रादिर्ययोःतपस्विनौसंततंमौ अधुनाततत्यक्ता ।

ना ३

इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह किमिदमित्यष्टभिः साक्षात्स्वप्नस्तमिह जाग्रतैव दृष्टं २९
येमां व्यमोचयन्ते च क्व गताः ३० यद्यप्यहमस्मिन् जन्मनि दुर्भगः पापी यान् अथापि जन्मान्तरेन
नेपुण्यवानस्मीत्याह विबुधोत्तमदर्शने इति निमित्तसप्तमी तेषां दर्शनार्थं पूर्वेण मंगलेन महता

किमिदं स्वप्न आहोस्वित्साक्षाद्दृष्टमिहाद्भुतं क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः
२९ अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः
३० अथापि मे दुर्भगस्य विबुधोत्तमदर्शने भवितव्यं मंगलेन येनात्मा मे प्रसीदति ३१ अ
न्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः वैकुण्ठनामग्रहणं जिह्वा वक्तुमिहार्हति ३२ क्व
चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः क्व च नारायणेत्येतद्भगवन्नाम मंगलं ३३ सोहं
तथा यतिष्यामि यतचित्तेन्द्रियानिलः यथा न भूय आत्मानमन्धे तमसि मज्जये ३४ विमु
च्य तमिमं बन्धमविद्याकामकर्मजं सर्वभूतसुहृच्छान्तो मैत्रः करुण आत्मवान् ३५ मोच
ये ग्रस्तमात्मानं योषिन्मय्यात्ममायया विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ३६ ममा
हमिति देहादौ हित्वा मिथ्यार्थधीर्मतिं धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ३७ श्री
शुक उवाच॥ इति जातसुनिर्वेदः क्षणसंगेन साधुषु गंगाद्वारमुपेयाय मुक्तसर्वानुबन्धनः

पुण्येन भवितव्यं येन तद्दर्शनेन ३१ अन्यथा पूर्वपुण्यं विना कथं मृते वैकुण्ठनामग्रहणं तेन वशीक्रि
यतेऽनेनेति निग्रहणं ३२ ब्रह्मघ्नः विप्रहन्ता पातकः ३३ ३४ ३५ ३६ अस्मिन्मिथ्याभूतेऽर्थे धीर्यय

प्रत्याहृतइंद्रियग्रामोयेन ३९ गुणेभ्योदेहेंद्रियादिभ्यआत्मानंवियुज्यविशोध्य आत्मसमाधिना
चित्तैकाग्र्येणभगवतोधाम्निस्वरूपे ४ तस्मिन्भगवद्धाम्निउपारतानिश्चलाधीर्यस्यसः तस्मिन्का
लेद्राक्षीदितिचाद्वरः पुरतः तान्पूर्वमुपलब्धानेवज्ञात्वानुपलभ्यप्रत्यभिज्ञायववंदे ४१ ४२ ३

सतस्मिन्देवसदनआसीनोयोगमास्थितः प्रत्याहृतेंद्रियग्रामोयुयोजमनआत्मनि ३९ ततो
गुणेभ्यआत्मानंवियुज्यात्मसमाधिना युयुजेभगवद्धाम्निब्रह्मण्यनुभवात्मनि ४ यर्ह्यु
पारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः उपलभ्योपलब्धान्प्राग्ववंदेशिरसाद्विजः ४१ हि
त्वाकलेवरंतीर्थेगंगायांदर्शनादनु सद्यःस्वरूपंजगृहेभगवत्पार्श्ववर्तिनां ४२ साकं
विहायसाविप्रोमहापुरुषकिंकरैः हैमंविमानमारुह्यययौयत्रश्रियःपतिः ४३ एवं
सविप्लावितसर्वधर्मोदास्याःपतिःपतितोगर्ह्यकर्मणा निपात्यमानोनिरयेहतव्रतः
सद्योविमुक्तोभगवन्नामगृह्णन् ४४ नातःपरंकर्मनिबंधकृंतनंमुमुक्षतांतीर्थपदा
नुकीर्तनात् नयत्पुनःकर्मसुसज्जतेमनोरजस्तमोभ्यांकलिलंततोन्यथा ४५ यएतं
परमंगुह्यमितिहासमघापहं शृणुयाच्छ्रद्धयायुक्तोयश्चभक्त्यानुकीर्तयेत् ४६

प्रसंहरतिएवमितिद्वाभ्यां विप्लाविताःसर्वधर्मायेन हतंव्रतंस्वदारनियमादियस्य ४४
कर्मनिबंधस्यपापमूलस्यकृंतनंछेदकमतःपरंनास्ति कस्मात्तीर्थपदस्यअनुकीर्त
नात् तत्रहेतुः यद्यतोऽनुकीर्तनात् ततोऽनुकीर्तनादन्यथाप्रायश्चित्तांतरैः रजस्तमोभ्यां

कलिलंमलिनमेवतिष्ठतियतस्ततः ४५

न चेक्षितो भवति ४७ म्रियमाणः अवशात्तेन ग्रहादिविहीनोपि ४८॥ इति श्रीभावार्थदीपिकायां षष्ठस्कं-
धे द्वितीयोध्यायः॥२॥ तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः । सांत्वयित्वा स्वदूतानां स्वैर्वीस्ववैः किंक-
रीकृताः विष्णुदूतैर्निर्णीते शास्त्रार्थे यमस्तु स्वेन दृष्टमपि तत्तत्तीयाध्यायारंभः तत्र यदुक्तं यमदूतेन
ध्या सर्वं माच वक्तारेति तन्नः किं तत्र हतमिति पृष्ठं तत्ति निशम्येति मुरारेः नैदेशिकैः किंकरैः एवं हि
तान् अत एव हताज्ञा आज्ञा यस्य यस्य वशाव तौ अयं जनः सोपि तान्प्रति किमाह १ अन्याश्च यमेन दि

न वै स नरकं याति नेक्षितो यमकिंकरैः यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ४७ म्रिय-
माणो हरेर्नाम गृणन्पुत्रोपचारितं अजामिलोप्यगाद्धाम किं पुनः श्रद्धया गृणन् ४८॥ इति
श्रीभागवते षष्ठस्कंधे द्वितीयोध्यायः॥२॥ राजोवाच॥ निशम्य देवः स्वभटोपवर्णितं प्रत्याह।
किं तानपि धर्मराजः एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोयं १ यमस्य देवस्य
न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत् एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्य इति मे।
विनिश्चितं २॥ श्रीशुक उवाच॥ भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः पतिं विज्ञापयां।
मासुर्यमं संयमनीपतिं ३॥ यमदूता ऊचुः॥ कति संतीह शास्तारो जीवलोकस्य वै प्रभो त्रैविध्यं
कुर्वतः कर्मफलाभिव्यक्तिहेतवः ४

न्याहृ यमस्येति हे ऋषे यमस्य दंडभंगः कुतश्चन कस्माच्चिदपि श्रुतपूर्वो नासीत् एतदेतत्मिन्नर्थेय
हानञ्च तत्पूर्वं एतद्यमहतनिराकरणं नासीत् अतः सर्वस्यापि लोकस्य संशयो वर्तते तं च त्वत्तोन्यो
न छिंद्यतीति मे निश्चितं अतः कथयेति शेषः २ भगवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः
पुरुषाः कति संति शास्तारो नियंतारः त्रैविध्यं त्रिविधं यथा भवति तथा कर्म कुर्वतः तद्यैव कर्मफला।

संतु बहवः को बाधः तत्राहुः यदीति सत्प्रवृत्ताः स्वप्रमत्तेस्वके तेषां विप्रतिपत्तौ तेऽमेकस्य स्यात् नो न कस्या
पि परस्परविरोधे नोभयोरपि प्रतिबंधात् ऐकमत्ये तु कस्य वा न स्यात् एकः स एव कर्तुमिच्छति द्वि
तीयोऽन्यः ऐकमत्ये च तयोः परस्परकार्यानुमोदने नोभयोरपि ग्रामेः कस्य वा तेऽभेऽपि न स्यात् नामि
त्यर्थः ५ ननु बहूनां कर्मिणां व्यवस्थया बहवः शास्तारो भवंतु तथा सति नायं दोषः स्यात् तत्राहुः ब
हूनां कर्मिणां व्यवस्थया शास्तृत्वं बहूनां शास्तृत्वं स्यात् चेदेतत् किं तु तदा यस्त्वं शास्तारिमाख्ये शास्तृ

यदि सर्वे बहवो लोके शास्तारो दंडधारिणः कस्य स्यात् नो न वा कस्य स्वप्रमत्तमेव वा ५ किं
तु शास्तृत्वं बहूनां स्याद्बहूनामिह कर्मिणां शास्तृत्वमुपचारो हि यथा मंडलवर्तिनो ६ अत
स्त्वमेको भूतानामीश्वराणामधीश्वरः शास्ता दंडधरो नृणां शुभाशुभविवेचनः ७ तस्य
ते विहतो दंडो न लोके वर्तते धुना चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता नीयमानेन ते भ
टैः शासनस्याभिधानेन नारायणेत्यस्माद्भवत्यांतकुनंकिंकराणां प्रसह्यते ९ तास्त्वे वेदितुमि
च्छामो यदि नो मन्यसे क्षमं नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतं १० ॥

तेन तदेकदेशे उपचारमात्रमेव स्यात् यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मंडलवर्तिनामुपचारमा
त्रं निरंकुशत्वाभावात् ६ यस्मादेवं शास्तृत्वं बहूनां न घटते अतस्त्वमेक एव शास्ता शुभाशुभे विवि
नक्तीति तथा ७ विप्रलंभिता वंचिता लंघितेत्यर्थः ८ तदेवाहुः नीयमानमिति ९ ते तव नः य
दि नोऽस्माकं क्षमं हितं मन्यसे प्रत्यया ज्ञानं तत् त्वदवज्ञानेन तथाचापि त्वनर्थः स्यात् अन्तर्को हि ते
षां प्रभावः यतो नारायणायेति केवलमभिहिते मा भयं कुरुत इति वदंतः शीघ्रमागताः १०

श्री
भा॰ ष॰
११

संयमयतीति तथा मत्तोन्यो जगतस्तस्थुषश्च प्रभोः पतिरस्तीति अहं तु जंगमानामेव न तु स्थावराणा
मेव तत्राप्यधार्मिकाणामेव न तु किं कारः स्वतन्त्रः स तु सर्वेश्वरः कोसौ यत्र यस्मिन् विश्वमोतं च प्रोतं च ऊ
र्ध्वं तिर्यक् तन्तुषु पटवत् यस्यांशेभ्यो विश्वस्य ब्रह्मरुद्रेभ्यः स्थित्यादयो भवन्ति यस्य च वशे लो
कोवर्तते नसिकायां प्रोतबलीवर्दवत् १३ यतः स्वयं च यति ब्राह्मणादिनामभिर्वाचि निजायां तन्

श्रीशुक उवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः प्रीतः स्वदूतान्प्रत्याह स्मरन्पादा
म्बुजं हरेः १२ ॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं यदंशतो
स्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः १२ यो नामभिर्वाचि जनं निजायां बध्ना
ति तन्त्र्यामिव दामभिर्गाः यस्मै बलिं त इमे नामकर्मनिबन्धबद्धाश्चकिता वहन्ति १३ अहं
महेन्द्रो निरृतिः प्रचेताः सोमोग्निरीशः पवनोर्को विरिञ्चिः आदित्यविश्वे वसवोथ साध्या
मरुद्गणा रुद्रगणाःससिद्धाः १४ अन्ये च ये विश्वसृजोमरेशा भृग्वादयोस्पृष्टरजस्तमस्काः
यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोन्ये १५

त्र्यां दामसु यो जनं योबध्नाति दाम रा
भिर्गा बलीवर्दानिव च त इमे जीवा नामकर्मभिर्निबन्धैर्बद्धाः यस्मै बलिं वहन्ति यदधीनाः कर्म
कुर्वन्तीत्यर्थः १३ अस्य बलीलाद्युर्विभावयन्नाह अहमिति द्वाभ्यां न स्पृष्टं रजस्तमश्च यैः ईहि म
तं अभिप्रेतं चेष्टितं वा न विदुः स्पृष्टमायाः मायया स्पृष्टाः ततस्तेभ्योन्ये न विदुरिति किं पुनर्वक्त ॥

तन्मायया मोहितत्वात्तज्जानन्तीत्युक्तं अविषयत्वाच्च न तस्येत्याह यमिति गोभिरिन्द्रियैर्हृदा चित्तेन न विच
क्षते न पश्यन्ति यद्वा वाचा न स्तुवन्ति यं मनो न मनुते इत्यादि श्रुतेः आत्मनो जीवान् आत्मानं द्रष्टारं
आकृतयो रूपाणि च चक्षुर्यथा कर्मभूतं न जानन्ति ततः परमात्मनो नाप्रकाशकेन हि प्रमाणान्प्रमा
माणस्य विषय इति भावः एवंभूतः परमेष्ठी तत्त्वानि एवं नैव संवेद्यः १६ भवन्त्वेवंभूतोऽन्यः परमेष्ठ
ः ये पुनरस्मान्निर्भर्त्स्य पापिनं रक्षन्ति वन्नः ते के तान्नाह तस्येति द्वाभ्यां तस्यैव रूपगुणाः प्रभावात्स्वयं

यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते आत्मानमन्तर्हृदि संतमात्मनां चक्षुर्यथै
वाकृतयः ततः परं १६ तस्यात्मतन्त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः प्रायेण
दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः १७ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिं
गानि महाद्भुतानि रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च १८ धर्मं तु साक्षाद्भग
वत्प्रणीतं न वै विदुरृषयो नापि देवाः न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचा रामा ३
रणाः १९ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः प्रह्लादो जनको भीष्मो बलिर्वैयासकि
र्वयं २० द्वादशैते विजानीमो धर्मं भागवतं भटाः गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते २१ म १

स्वभावः भक्तवात्सल्यादयो येषां ते १७ विष्णोर्भूतानि भृत्याः दुर्दर्शानीति द्रष्टुमशक्यानि लिंगानि
रूपाणि येषां तानि तद्भक्तिमतः विष्णुभक्तान् परेभ्यः शत्रुभ्यः सर्वतः सर्पाग्न्यादिभ्यश्च रक्षन्ति १८
ननु विष्णुभक्ताश्चेत् कथं पुंसां ब्राह्मणानेन कृतवन्तः तत्राह धर्ममिति ऋषयो भृग्वादयः १९ ननु के
पि चेन्न जानन्ति तत्र स्वसमवं किं प्रमाणं तत्राह स्वयंभूरिति कुमारः सनत्कुमारः वयमित्यात्मानमेव व

[illegible] ६ [illegible] ५५

भा.६
१२

तमेव धर्ममाह एतावानिति २२ नचात्र प्रमाणं वक्तव्यं इत्याह नामोच्चारणेति येनैव केवले
न सकृदुच्चारितेन २३ ननु नामाभासेन कथं सर्वपापक्षयः स्यात् श्रद्धाभक्त्याद्यन्यादेरपि विधानात् तथा
हि सांवं प्रानर्हणानभक्ताद्ः त्वग्रामात् विमुच्यन्त इति अनुदिनमिदमादरेण शृणुयादिति श्रवणकी
र्तनं ध्यानं हरेरद्भुतकर्मणः जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितमित्याद्यस्मिन्नेव पुराणेन च तत्र
पक्षे न पुराणान्तरे च पापक्षयश्च भवति स्मरतां तमहर्निशमिति अत्रैव वचनस्मात्संकीर्तनेनेविस्तोर्ने
गन्मगलमहसामहतामपि कोरक्षाविघैकान्तिकनिष्कृतमित्यादिना सम्यक्कीर्तनादेवमयोदे

एतावानेव लोकेस्मिन् पुंसां धर्मः परः स्मृतः भक्तियोगो भगवति तन्नामग्रहणादिभिः २२
नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः अजामिलोपि येनैव मृत्युपाशादमुच्यत २३ ए
तावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां विक्रुश्य पुत्रमघवान् य
दजामिलोपि नारायणेति म्रियमाण इयाय मुक्तिं २४ ॥

यं तेते किंचन थाप्सति किमिति मन्वाद
यो द्वादशवर्षादीनि स्मरेयुः तस्मादिदमनुपपन्नमिव न ग्राह्यं एतावतेति भगवतो गुणानां कर्मणां च
नाम्नां च सम्यक्कीर्तनेनेति यत् एतावता पुंसामघनिर्हरणाय पापक्षयमात्राय अलमप्ययोग्यो
नास्ति अलंशब्दोत्र वारणेन स्यात् ह अमरसिंहः अलंभूषणपर्याप्तिशक्तिवारणवाचकमिति उ
पयोगाभावमेवाह अजामिलो महापातकोपि नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा तत्पु
त्रे विक्रुश्य न तु हरिं अघवान् अशुचिरपि म्रियमाणः स्वस्थचित्तोपि मुक्तिमवाप न त्वघनिर्हर
णमात्रं अतो नामाभासेनापि सर्वपापक्षयस्त्वेवं तत्राह किं श्रद्धादिविषयस्तु पापवासनाद

१२ [illegible] २४

यत्तत्त्वमर्थं तर्हि द्वादशभ्यो न्यादिस्मरणमिति तत्राह प्रायेणेति महाजनो मन्वादिः अयं भावः यथा मन्
दे नौषधीमज्ञानेनोपयोगेनापि हरणाय त्रिकटुकनिंबादीनि स्मरंति तथा स्वयं मधुरमप्य
त्वद्वादशाव्यतिरेकेणायं महाजनो नाम ह्यमिदमत्तानाद्वादशाहिकं स्मरतीति किंच मायया दे
व्या अलं मोहितमतिरयं जनः मधुमधुरं यथा भवति एवं पुष्पितायां शुभस्थानीयैरर्थवादैर्म
नोहरायां त्रय्यां जडीकृतामतिरभिनिविष्टामतिर्यस्य अतो महत्येव कर्मणि श्रद्धया युज्यमानो नाल्पे
प्रवर्तते दृश्यते हि प्राकृतस्य लोकस्य महति मंत्रादौ श्रद्धा अल्पे चाश्रद्धा तस्मात्स्वग्राहकोनानी

प्रायेण वेद तदिदं न महाजनोयं देव्या विमोहितमतिर्बत माययालं त्रय्यां जडीकृतमतिर्मधु
पुष्पितायां वैतानिके महति कर्मणि युज्यमानः २५ एवं विमृश्य सुधियो भगवत्यनंते स
र्वात्मना विदधते खलु भावयोगं ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरु
गायवादः २६ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः तान्नोप
सीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे २७

त्ति तैर्नोक्तं यद्वा स्वाधीनः सिंहस्त्वेनात्तवत्साच्छस्रगालादिनिवारणाय तं यथा न प्रयुंजते तथाऽ
तितुच्छत्वात्पापस्यानंतत्रिरसनाय परमं मंगलं हरेर्नाम स्मरंति यद्वा नाममाहात्म्यज्ञाने सर्वे भक्ति
प्रसंगात्स्त्रियो वादिकं ग्रंथविस्तरभयात्तु नातिप्रपंच्यते २५ भावयोगं भक्तियोगं अमीषां पातकं ना
स्त्येव यदि स्यात् उरुगायस्य वादः कीर्तनं २६ न ते देवपर्मतन्तु निर्णीयमत्यानन्तु पाक्षिनः इति ये भ
गवत्प्रपन्नाः ते देवैः सिद्धैश्च परिगीता पवित्रगाथाः वर्णितपवित्रकथाः अतः तान्नोपसीदत न

समीपमपि गमाः छुतवयः कालोपि न प्रभवति २२

केतर्हि दंडार्था मानेयास्तत्राह तानिति द्वाभ्यां असतः दुष्टान्तानेवाह मुकुंदपादारविंदयोर्यो म
भा॰ष॰ करंदरूपो रसस्तस्मात् विमुखान् कथंभूतात् निष्किंचनैरजस्रं जुष्टात् तेषां तापकमाह निरयव
टी॰ र्त्मनि स्वधर्मशून्ये गेहे बद्धा तृष्णा यैस्तान् २८ किंच जिह्वेत्यादि यस्य जिह्वेत्यादिरन्वयः न
१३ कृतं विष्णुकृत्यं भगवद्व्रतं यैः २९ भावं तेन क्षमापयति तदिति अयं भावः नः स्वपुरुषैरसदीप

तांस्तानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं निष्किंचनैः परमहंस
कुलैः रसंगैर्जुष्टान् गृहे निरयवर्त्मनि बद्धतृष्णान् २८ जिह्वा न वक्ति भगवद्गुणनामधेयं
चेतश्च न स्मरति तच्चरणारविंदं कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽ
कृतविष्णुकृत्यान् २९ तत्क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्
कृतं नः स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने ३० त
स्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतिं ३१
शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ३२

तेन स्थितैः स्वीयैरेव पुरुषैर्यद्यस्मात् असत् अन्याय्यं कृतं तत्तस्मात् स्वयमेव तत्क्षम्यतां सहतां स्वा
नां स्वीयानां नः न विदुषां अस्मानं अहो गरीयसि सन् तस्मिन् क्षांतियुक्तैव महदिति पाठे स्वीयानां मा
हात्म्यमविदुषां नः क्षमा योग्येत्यर्थः ३० तस्मादित्यादि अवैकांतिकं जगन्मंगलरूपं ३१ १२
ऐकांतिकत्वमेवाह शृण्वतामिति व्रतादिभिः न तथा न शुद्ध्येत ३२ ॥

पतत्पयपाययति कृष्णांघ्रिपद्मयोर्मधुलेहि स्वास्वादयतीति मधुलिट् हानच्छं तेन विसृष्टाये मायागु
णाविषयाः तेषु पुनर्नरमंते अन्यस्तु तन्मध्वास्वादरहितः अतएव कामाभिभूतः सन्नातोज्ञः
पापं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत यतः कर्मणः पुनरपि तैः पापं स्यादेव कुंजरशौच
वत् सतत्वेशोधकत्वाभावात् ३३ नैव विस्मितधियो वभूवुः किंतु सत्यमकमित्येवमेनिरे ततः प्रभृ
ति प्रतिशंकमानाः अस्मान्नैव वैष्णवहत्यादि इति शंकावंतः तद्दृष्टमपि बिभ्यति स्म पाठांतरे नवि
कृष्णांघ्रिपद्ममधुलिट्नपुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु अन्यस्तु कामहतआ
त्मरजः प्रमार्ष्टुमीहेत कर्मयत एव रजः पुनः स्यात् ३३ इत्थं स्वभर्तृगदितं भगवन्महित्वं सं
स्मृत्य विस्मितधियो यमकिंकरास्ते नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः
प्रभृति स्म राजन् ३४ इतिहासमिमं गुह्यं भगवान् कुंभसंभवः कथयामास मलये आसी
नो हरिमर्चयन् ३५ ॥ इति श्रीभागवते षष्ठस्कंधे तृतीयोऽध्यायः ३ ॥ राजोवाच ॥ देवासुरनृणां
सर्गो नागानां मृगपक्षिणां सामासिकः त्वया प्रोक्तो यस्तु स्वायंभुवेंतरे १ ॥
स्मितधियो जाताः नैव ततः प्रभृति बिभ्यते स्मेत्यर्थः ३४ कुंभसंभवो गस्त्यो मलये पर्वते आसीनो
ऽर्च्यो हरिमर्चयन् पुनः पुनः विश्वासार्थं हरेः पाठोऽस्त्वेशानित्यर्थः ३५ ॥ इति भावार्थदीपिकायां
षष्ठे तृतीयः ३ ॥ चतुर्थोदितित्रिभिर्विश्वरूपजन्मविवक्षया प्रचेतःसुतदक्षस्य वंशस्तावत्प्रतन्यते
चतुर्थे तु प्रजासृष्टौ दक्षेणाराधनं हरेः तपसा हंसगुह्याख्यस्तोत्रेणाच निरूप्यते प्रसक्तानुप्रस
क्तेन स्वायंभुवस्तनान्वये नाम प्रभावमाकर्ण्य वंशस्यास्य वृत्तान्ते देवासुरेति द्वाभ्यां सामासिकः

भा॰ षं॰ टी॰ ४५

व्यासं विस्तारं तेन ततः यथा शक्त्या यथा ससर्ज तां यथा किं तत्प्रकारं च ज्ञातुमिच्छामि अनुसर्गं मन्वन्तरे स
र्गं २ १ दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह यदेति प्राचीनबर्हिषः पुत्रा यदा समुद्रम
ध्यादुन्मग्ना निर्गताः तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः नारदोपदेशात् प्राचीनबर्हिषो निवृत्त्या अरा
जके सति कृष्याद्यभावात् ४ तपसा दीपितो मन्युर्येषां ते तेषां द्रुमाणां दग्धुमिच्छया ५ ताभ्यां वा॰

तस्यैव व्यासमिच्छामि त्वत्तोहं ते भगवन् यथा अनुसर्गं यया शक्त्या ससर्ज भगवान् परः २॥ सू
त उवाच॥ इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः प्रतिनन्द्य महायोगी जगाद मुनिसत्तमाः
॥शुक उवाच॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः अन्तः समुद्रादुन्मग्ना ददृशुर्गां द्रुमै
र्वृतां ४ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः मुखतो वायुमग्निं च ससृजुस्तद्दिधक्ष
या ५ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह राजोवाच महान् सोमो मन्युं प्रशमयन्निव
६ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः
अहो प्रजापतिपतिर्भगवान् हरिरव्ययः वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ८ अ
न्नं चराणामचरा ह्यपदः पादचारिणां अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ९ यूयं च
पित्रान्वादिष्टा देवदेवेन चानघाः प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ १० आतिष्ठत

यत्र ताभ्यां दह्यमानान् ज्ञात्वा द्रुमान् वनस्पतीनां राजा ॥सोम उवाच॥ ६ मा द्रुमेभ्य इति नवभिः हे महा
भागाः विशेषेण वर्द्धयितुमिच्छवः ७ प्रजापतीनां पतिर्ब्रह्मा भोज्यदाहो न विनश्यत्याह अहो इ
ति त्रिभिः ऊर्जं भक्ष्यं इषमन्नं ८ ९ १० अतस्मात् निघ्नत आश्रयत सतां मार्गं उपशमं पित्रादिभिर्

श्री ष ४५

प्रजानां प्रजापतिर्देवदेवः अनन्तजीविकानाशेन कर्तव्यः इति हृष्टांत पंचकेनाह लोकानां पालानां
मातापितरौ अज्ञानां ज्ञानदो बुध एव सुहृत् १२ ईश्वरत्वेन नाच्यम् अनन्तो हीनवृत्तं इत्याह अनन्ते
हैश्वितिवः प्रभाभिः १३ आकाशाद्देहे समुत्पतितं आकस्मिकमित्यर्थः आत्मविचारेणयोनि
लोकानां पितरौ वंधुः ईशः पत्न्यः स्त्रियाः पतिः पतिः प्रजानां भितृणां गुरुः ज्ञानां बुधः सुहृत्
१२ अनंतदेहे प्रभु नानामान्मा स्नेह हरिरीश्वरः सर्वं तद्धि स्वयमीहस्त्वमेवैव लोषिता हासौ १३
यः समुत्पतितं देहं आकाशात्मनस्त्वया मलत्वेन आत्मजिज्ञासया यत्स्वगुणानतिवर्तते १४ स
लेटे पे तु मैत्रीनैः खिलानां शिवमस्तु वः वार्क्षी ह्येवा वा कन्या पत्नी त्वप्रतिरक्षिता १५
इत्यामं त्र्यवरा रोहा कन्या मारिषा सीत् च सोमो राजा यथोदत्ता ते यथमे णोपयेमिरे १६ तेभ्यः
तस्यां समभवत् दक्षः प्राचेतसः किलेयस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः १७ यथा
ससर्जे भूतानि दक्षो दुहितृवत्सलः रेतसा मनसा चैव तन्ममावहितः शृणु १८ मनसैवासृ
जत्पूर्वं प्रजापतिरिमाः प्रजाः देवासुरमनुष्यादीन् भस्थलजलौकसः १९ तमबृंहितमा
लोक्य प्रजासर्गं प्रजापतिः विंध्यपादानुपव्रज्य सोऽचरत् दुष्करं तपः २० तत्राघमर्षणं नाम
तीर्थं पापहरं परं उपस्पृश्यानु सवनं तपसातोषयद्धरिं अस्तौषीत् हंसगुह्येन भगवन्तमधो
पजेन २४ खिलानां ये भेषाणां वः पृष्ठाकं च शिवमस्तु हृदार्तवेणार्येन दीयोकन्यां दद्यातिवार्क्षी
वृक्षैः पालिता २५ आसं प्रमोचा यित्वाम्लाम्लापसीं अप्सरसः प्रम्लोचा या सुता २६ २७ दुहितृवत्स
लः इति तस्य कन्या वेपा एव तु तन्ममतः १८ प्रजापतिर्दक्षः १९ अबृंहितं असंवृद्धं विंध्यस्य पा

परायसर्वोत्तमायनमोदधेनमस्करोमि परत्वेहेतुः अवितथानुभूतिः चिच्छक्तिर्यस्य अतोगुणत्र
याभासोजीवोनिमित्तेमायाचतयोर्वंधवेनियंत्रे एवमपिगुणतत्त्वबुद्धिभिर्येजीवास्तैर्नदृष्टंधामस्वरू
पंयस्यतत्रहेतुः निवृत्तमानेयस्मान्मानंप्रमाणंततोनिवृत्तमानमनवधिंवायस्मात्तंतर्हिकथंतत्रआह
स्वयंभुवेस्वप्रकाशाय २३ अदृष्टधामत्वंदर्शयन्नाह नेति पुरुषः सखाजीवः अस्मिन्पुरेदेहेवस
न्नपिअत्रैवसंवसतः सख्युर्यस्यसख्यंकर्मप्रवर्तकत्वादिकंनावैतिनजानातितत्रदृष्टांतः

प्रजापतिरुवाच॥ नमः परायावितथानुभूतयेगुणत्रयाभासनिमित्तवंधवे अदृष्टधाम्ने
गुणतत्त्वबुद्धिभिर्निवृत्तमानायदधेस्वयंभुवे २३ नयस्यसख्यंपुरुषोवेत्तिसख्युः सखाव
सन्संवसतः पुरेस्मिन् गुणोयथागुणिनोव्यक्तदृष्टेः तस्मैमहेशायनमस्करोमि २४
देहोसवोक्षामनवोभूतमात्रानात्मानमन्यंचविदुः परंयत् सर्वंपुमानवेदगुणांश्चतत्
ज्ञोनवेदसर्वज्ञमनंतमीडे २५

व्यक्तदृष्टेः प्रपंचद्रष्टुः नहिरूपादिरूपयोभवतीतिप्रत्यक्षमानपाठेव्यक्तेप्रपंचएवदृष्टिर्यस्यसः गुणोवि
षयोगुणिनोविषयिणइंद्रियादेः सख्यंप्रकाशकत्वंयथानवेत्तितद्वत् २४ ननुगुणोजडत्वान्नजा
नातुजीवस्तुचेतनः किंमितिनजानातिअतआहदेहइति देहः असवः प्राणाः अक्षाणीन्द्रि
याणिमनवः अंतःकरणानिभूतानिचमात्राः तन्मात्राणिआत्मानंस्वस्वरूपंदृश्यमन्या
निंद्रियवर्गंनयोः परंदेवतावर्गंचनविदुः पुमानजीवस्तुसर्वमेतत्त्रयंवेदगुणांश्चतन्मूलभू

स्वरूपमेवमुक्त्वा स्वप्रकाशत्वमाह यदा मनस उपरामः समाधिः न तु सुषुप्ताविव लयः नच जाग्र
त्स्वप्नयोरिव विक्षेपः तदाह नामरूपे रूप्यंते येन तत्तथा तस्य उपरमे हेतुः दृष्टं दर्शने स्मृतिश्च त
योः संप्रमोषात् तन्नाशात् तदा यः केवलेन स्वरूपज्ञानेन प्रतीयते तस्मै हंसाय शुद्धाय शुचिसद्म
नः सम्यक्प्रतीतिस्थानः यस्तस्मै नमः २६ एवंभूतः केषां प्रतीयत इत्यपेक्षायामाह मनीषिण इ
ति द्वाभ्यां विवेकिनो यं निष्कर्षंति विविच्य ध्यायंति स निर्वाणसुखानुभूतिर्मम प्रसीदतामिति
द्वयोरन्वयः एवं निष्कर्षतोऽप्रतीयत इत्यभावः किमिति निष्कर्षंति स्वशक्तिभिः रुद्धस्वप्रका

यत्रोपरमो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् य ईयते केवलया स्वसंस्थया हंसा
य तस्मै शुचिसद्मने नमः २६ मनीषिणोंतर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृ
द्भिः वह्निं यथा दारुणि पांचदश्यं मनीषया निष्कर्षंति गूढं २७ स वै ममाशेषविशेष
मायानिषेधनिर्वाणसुखानुभूतिः स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मश क्तिः

शमानेकतिभिर्नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः सप्तविंशतिगुणात्मिभिर्गूढं स्वद्धा विपेति निष्कर्षं
तीत्यर्थः यद्वा नवभिः प्रकृतिपुरुषमहदहंकारपंचतन्मात्ररूपाभिः त्रिवृद्भिः त्रिगुणात्मिकाभिः
चकारात् षोडशविकाररूपाभिश्च कथंभूतं निष्कर्षंति मनीषया अंतर्हृदि संनिवेशितं निश्च
लीकृतं पांचदश्यं पंचदशसामिधेनीमंत्रैः प्रकाश्यं अलौकिकं वह्निमिव अहंकारस्य दारोरा
त्मनोऽन्यपरमात्मानं निष्कर्षंतीत्यर्थः २७ अशेषाणां विशेषाणां यस्याः तस्या मायायाः निषेधेन नि
र्वाणसुखानुभूतिर्यस्य अप्रसक्तनिषेधासंभवान्नप्रसक्तिमाह स एव सर्वनामा स एव विश्वरू

भा॰ बे॰
१६

नत्वयदि केवलया सत्स्वया प्रतीयते नहि सर्वनामत्वेचानुपपन्नेवागाय गोचरतादित्याप्रोक्तं सर्वैर्नो
मभिर्वाच्यं प्रत्यत्वादिरूपं च तस्य स्वरूपं वस्तुतो नामभूत्. तथापि मायया च्छन्नत इति श्लोकार्थे इत्येतोप्यप्रा
रूपत्वमस्तुरेति यद्यदिति यद्य तु वसा निरुक्तं अभिहितं धिया निरूपितं अवसितं अत्रहि भिर्वाद्
द्विये निरूपितं गृहीते अतोपि मनसापि निरूपितं संकल्पितं यस्य स्वप्रकाशत्वं तस्य न तत्स्वरूपं नाम भ
त्. स्वरूपनाभावे हेतुः हि यस्मान्नन्त गुणानामेव रूपं पाठान्तरे गुणो वै हि न सत्त्वगुणव्यतिरिक्तः य
तो गुणानामपाय विसर्गाभ्यां प्रलयो अन्तिम्याल स्त्यत इति तथा चेन ना[illegible]ः धिष्ठानं विना न योर
संभवात्. यद्वा यस्य स्वरूपं नामभवति तस्येन मरति तु नीयेनान्वयः २४ तदेव वस्तुतो गुणरूपता
यद्यद्विरुक्तं वचसा निरूपितं धियाक्षिभिर्वा मनसा वो तयस्य नाम स्वरूपं गुणरूपं हि तेस
वै गुणापाय विसर्गलक्षणाः २४ यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च प
रवरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं २० ॥ भावमेगीकृत्य अनिरुक्तात्मशक्ति
रिति नेन योतितं मायया सर्ववाच्यत्वेन विश्वप्रमाद्य स्मिन्नधिकरणे यतो पादानात् येन करण
ेन यस्य संबंधि यस्मै संप्रदानाय यदीप्सिततमं यः कर्ता कुरुते स्वतंत्रः कार्यते वान्येन प्रयोज्यका
र्तृत्वे तद्ब्रह्मेति प्रत्येकं संबंधः अत्र च सप्तभिः पदैः सप्तविभक्त्यर्थाः दर्शिताः यथेति च क्रियाकार
कस्वेवंप्रकारत्वाविनाभव्यया नाम र्थाः कुरुते कार्यते चेति सार्थे क्रियान्वयस्य सर्वेषां दर्शितः च
शब्देन भावकर्मादि विहित प्रत्ययार्थाः संगृहीताः तद्ब्रह्मैवेति कुतस्तत्राह तद्धेतुः तेषां कारणं त
त्कुतः सर्वेभ्यः प्राक्प्रसिद्धं तद्ब्रह्म स्वादयः तद्धेतवः श्रूयन्ते अवरेच हरण्यते तत्कार्य ब्रह्मैव तद्धेतुः
तत्राह परेषां अवरेषां च हेतनां परम कारणं तत्सर्व कारणत्वेन स्यकिं नाम सहकारि भवेत्तदा ।

१६ श्रीमत्समस्तभावान्तरगतिवेदं [illegible] ८ श्री[illegible]
[illegible] २४

नन्वेवं सत्ये विप्रमस्य हेतुः तर्हि न कदाचिदमीषां मतादिति वदन्तो मीमांसकाः कुतोत्र विवदंते
तैश्चान्ये स्वभाववादिनः संवदंते नेतेच हिततत्त्वविच्छिरोधिना अपि कुतः पुनः पुनः सङ्ख्येतित त्राह यस्य
माया विद्यायाः शक्तयो विवादसंवादस्य भवः स्यानानिभवंतितसेतंनमः ३१ ननु किं
तद्भस्य यस्य शक्तयो विवादादिभवो भवंतितत्राह अस्तीति योगउपासनाशास्त्रं नत्र हि विराट्
देवतोपासनायां पाताल पादादि कमस्तीत्युपास्यत्वेन विधीयते नास्तीति सांख्यैर्ज्ञान प्रशास्त्रंतत्र
ह्यपाणिपादः अचक्षुः श्रोत्रमिति च पादादि नास्तीति निषिध्यते तयोर्योगसांख्ययोर्यं किं चिन्म
मेअनुवर्तमानेऽवेतिनेप्रतीतेनत्रह्यस्य विवादेव्यविवादास्पदं ब्रह्मसेत्यर्थः विवादेऽस्फुटय

वस्तुनयो वदन्तो वादिनो वै विवादसंवादभुवो भवंति कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमो
नंतगुणाय भूम्ने ३१ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः अ
नाविनार्थेन न दृश्यंते मनोभवाः कर्मभिर्ध्यायतो नानाकर्माणि मनसोभवन् २४ अयं हि दे
हिनो देहो द्रव्यज्ञानक्रियात्मकः देहिनो विविधक्लेशसंतापकृदुदाहृतः २५ तस्मात्स्वस्थे
न मनसा विमृश्य गतिमात्मनः द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश २६

पुंसो मनस एव निमित्तात् कर्माण्यभवन् पाठांतरे कर्माणीप्सितत्वमभिध्यायत इत्यर्थः कर्मणोपि
मनोभवत्वात्तत्साध्या अपि मनोभवा एवेति भावः २४ नन्वेवं मनसः स्वप्नादौ कोटि देहेन तम
के न तत्र देहस्तर्वयो मूलमित्याह अयं हीति हीत्यवधारणे अयं द्रव्यज्ञानक्रियात्मकः अधिभूता
धिदैवाध्यात्मरूपो देह एव देहिनो देहोहमितिमन्यमानस्य देहिनो जीवस्य विविधान्क्लेशान्संता
पांश्च करोतीति तथा २५ स्वस्थेनाव्यग्रेण गतिं तत्वं ध्रुवार्थविश्रंभं ध्रुवोयमर्थ इति विश्रंभं विश्वासं प्रणयं वा त्यका

अंगिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारदो दिशतीति एतामि
ति उपनिषद्भ्यां परं श्रेयो यस्मात् तस्मादुपनिषत् मंत्ररूपोपनिषत् तां प्रतीच्छ रहस्यं द्रष्टा द्रक्ष्यतीति भगवान् १
२२ अत्र लं च तत्र त्वं नचिरं च समानाधिक अन्यं पदं महिमानं प्राप्स्यसीत्याह २८ ॥इति भावार्थ
दीपिकायां षष्ठे पंचदशः ॥१५॥ यो ऽसौ शोकेन संतप्तो नैव विशोकीकृतस्तं तं आदिदेश महाविद्यां नारदः शोक
वर्जिं आदौ तावत् पुत्रमृत्युरेव पितृ पोत्रादिसंबंधो मिथ्येति दर्शयितुं योगबलेन तमेवानीतं

श्रीनारद उवाच॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम यां धारयन् सप्तरात्राद् द्रष्टा संकर्षणं प्रभुं २
यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य सद्यस्तदीयमतुलानधि १ ३
कं महित्वं प्राप्ता भवानपि परं न चिरादुपैति २८ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे पंचदशो
ऽध्यायः ॥१५॥ श्रीशुक उवाच॥ अथ देवऋषी राजन् संपरेतं नृपात्मजं दर्शयित्वेति होवाच ज्ञा
तीनामनुशोचतां ॥१॥ श्रीनारद उवाच॥ जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते सुहृदो बांधवास्तप्ताः
शुचा त्वत्कृते भृशं २ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः भुंक्ष्व भोगान् पितृप्रत्तान् अधि
तिष्ठ नृपासनं ३ ॥जीव उवाच॥ कस्मिन् जन्मन्यमी मह्यं पितरो मातरो ऽभवन् कर्मभिर्भ्राम्यमा
णस्य देवतिर्यङ्नृयोनिषु ४ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः सर्व एव हि सर्वे बोभवंति क्रमशो मिथः

पितरं

नारदेन दर्शयित्वा जीवान् आनीय आह उवाच २ शेषमायुः स्थितिरस्ति अन्यस्य तु नास्ति तन्नाद्रियतां अर्थः तद्दे
वकलेवरं प्रविश्य स्थितो जीवं उवाच यद्वा अंतराले प्रेतशरीरे स्थित इति ज्ञेयं ३४ मयि स्नेहेन पुत्रत्वेन
भाषणं कथं तत्र कर्मबंधहेतोः किं न क्रियत इत्याशयेन संबंधस्यानियतत्वमाह बंधवो विवाहादिभिः
संबंधिनः ज्ञातयः सपिंडाः अरयो घातकाः मित्राः हितकाः मध्यस्थाः उभयव्यतिरिक्ताः साधारणाः १

कर्मभिर्भ्राम्यमाणत्वे दृष्टान्तः यथा वस्तूनि पण्यानि क्रियाग्रहाणि कर्तृषु परिभ्रमन्ति एवं जीवोपि यो।
निषु जनकेषु ६ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वे सदृष्टान्तमाह द्वाभ्यां नित्यस्य जीवत्वेपि अर्थस्य
पण्यादेः अनित्यः अनियतः विक्रियादिना संबंधनिवृत्तेः ७ एवं योनिगतः पित्रादिसंबंधं प्राप्तोपि स जी
वो नित्यः देहजन्मादिना तस्य जन्मादिभावात् अत एव वस्तुतो निरहंकृतः अहमस्य पुत्र इत्यभिमानशू।
न्यः यत्र पित्रादौ संबंधिभिर्यावदुपलभ्येत कर्मवशेन वर्तेत तावदेव तस्य पित्रादेः तत्त्वं स्वत्वेन त।
द्विक्रियानंतरकालमपि अयमेवं संबंधः यदुक्तं कलेवरं समाविश्येति तत्र तस्मिन्कलेवरे ममेदा
नींस्वत्वं निवृत्तमिति सदृष्टान्तमाह नित्यस्य चिरकालावस्थायिनः स्वर्णादेः योनिगतो देहं प्रविष्टः

यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु ६ नित्यस्यार्थ
स्य संबंधो ह्यनित्यो दृश्यते नृषु यावद्यस्य हि संबंधो ममत्वं तावदेव हि ७ एवं योनिगतो जीवः स
नित्यो निरहंकृतः यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ८ एष नित्योऽव्ययः सूक्ष्म एष सर्वा
श्रयः स्वदृक् आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ९

यत्र देहे तस्य जीवस्य तत्तस्मिन्देहे
स्वत्वं न तु मरणोत्तरकालमपीत्यर्थः शेषं समानं ८ जीवस्य नित्यत्वं साधयति एष नित्यस्तत्र हेतुः अव्ययः
अपक्षयशून्यः तत्कुतः सूक्ष्मः जन्मादिशून्यः तच्च कुतः सर्वाश्रयः जन्मादिमतो देहादेराश्रयः नतु
देहादिरूपः यतः स्वदृक् स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्ममायागुणैरात्मानमेव विश्वं विश्वा
त्मकं सृजतीति तदात्मानं स्वयमनुकरोतीति प्रकृते उपादानकारणत्वात्सर्वाश्रय इत्यर्थः जीवस्य वस्तु।
तो ब्रह्मत्वाद्ब्रह्मण एव विशेषणानि (?) विधिपुरुषस्य पुरत्वेन सृष्टता जीवः सृजतीति वाचोयुक्तिः यद्वा स्वक
र्महेतुः सृष्टिनिमित्तत्वेन सृष्टित्वं भोगस्य च सर्वस्य भोक्ता आश्रयत्वं चोक्तमिति द्रष्टव्यं ९

यदुक्तं सुहृद्भ्रातः इति सुहृद्वो वा यथा वास्तवमयद्यपि तदप्याह नह्यस्येति तत्र हेतुः एकः सुहृदादित्वेनाहि-
तः तत्कुतः गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वाधियः विविक्ताप्रद्रष्टृ तासां द्रष्टा
साक्षी १० यदुक्तं भुंक्ते भोगानित्यादि तत्कथमाह नादत्त इति गुणं सुखं दोषं दुःखं क्रियाफलं
राज्यादिकं उदासीनत्वे हेतुः परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता यतः ईश्वरः देहादिपा-
रतंत्र्यशून्यः अतएव मजन्नम मम च पुत्रत्वाकं च संबंधाभावाच्छोकं मा कुरु इति तात्पर्यार्थः ११ द्विजभा

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः १०
नादत्त आत्मा हि गुणं न दोषं न क्रियाफलं उदासीनवदासीनः परावरदृगीश्वरः ११ ॥श्रीशु-
कउवाच॥ इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृं-
खलां १२ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचितक्रियाः तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभ-
यार्तिदं १३ बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरू-
पितं १४ यमुनायां महाराज स्मरंत्यो द्विजभाषितं स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभि-
र्गृहांधकूपान्निष्क्रांतः सरःपंकादिव द्विपः १५ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजल-
क्रियः मौनेन संयतप्राणो ब्रह्मपुत्राववंदत १६ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने भ

षितं अंगिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्मरंत्यः पुत्रकामनाशून्या निर्ममाः सत्य इति भावः १४
निःक्रांतः पंकमिव त्यक्त्वा गृहं विहाय निःक्रमणमभूत् धीरस्य तस्यैव यो यं नान्यस्येति सदृष्टांतमाह सरः-
पंकात् द्विपो गजइवेति १५ कृतः पुण्यजलक्रियः पितृतर्पणं यायेन संयतप्राणो नियतेंद्रि

जी

भा० ६८ २

निवृत्ता द्वैतदृष्टिर्यस्मात् न्यस्ता निरस्ताः शक्त्यूर्मयः मायानिमित्ता रागद्वेषादयो येन २० मनसा सह व
चसि अप्राप्य उपरते सति यत् एकम् एव प्रकाशते वचसीति सर्वेन्द्रियोपलक्षितं सोऽस्मान् अवतु सदसत्परः का
र्यकारणयोः कारणं २१ तदेवाह यस्मिन्निदं कार्यं कारणेऽतिष्ठति अप्येति च यतश्च जायते मृण्मयेषु घ
टादिषु मृज्जातिः मृत्मात्रमिव सर्वगो ब्रह्मस्वं तु यत् तस्मै २२ ननु सर्वगो नु स्यात् न चेन्न जातिवत् प्रतीयेत कथं
मनोवचसोरप्राप्तिरित्याह यद्ब्रह्म व्योमवद्बहिरन्तश्च विततमपि असवः प्राणाः क्रियाशक्तयो न स्पृशन्ति मनआदी
नि च ज्ञानशक्तयो न विदुः तद्ब्रह्म नतोऽस्मि २३ तेषां तदज्ञाने हेतुमाह देहेन्द्रियादयोऽमी यदंशविद्धाः

नमो विज्ञानमात्राय परमानन्दमूर्तये आत्मारामाय शान्ताय निवृत्तद्वैतदृष्टये १९ आत्मान
न्दानुभूत्यैव न्यस्तशक्त्यूर्मये नमः हृषीकेशाय महते नमस्तेऽनन्तमूर्तये २० वचस्युपरतेऽप्राप्य
य एको मनसा सह अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः २१ यस्मिन्निदं यतश्चेदं तिष्ठत्य
प्येति जायते मृण्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः २२ यन्न स्पृशन्ति न विदुर्मनोबुद्धी
न्द्रियासवः अन्तर्बहिश्च विततं व्योमवत्तन्नतोऽस्म्यहं २३ देहेन्द्रियप्राणमनोधियोऽमी यदंश
विद्धाः प्रचरन्ति कर्मसु नैवान्यदा लौहमिवाप्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेति २४

यच्चैतन्यांशेनाविष्टाः सन्तः कर्मसु स्वविषयेषु प्रचरन्ति जाग्रत्स्वप्नयोः अन्यदा सुषुप्तिमूर्छादौ नैव प्रच
रन्ति यथाऽप्रतप्तं लोहं न दहति अतो यथा लोहमग्निप्रतप्तं एव दाहकं सत् अग्निं विना न दहति एवं ब्रह्म
णि तज्ज्ञाने क्रियाशक्तिभ्यां प्रवर्तमाना देहादयः न स्पृशन्ति न विदुश्चेति भावः जीवस्तर्हि द्रष्टृत्वाज्जानात्
त्वित्याह स्थानेषु जाग्रदादिषु द्रष्टृव्यपदेशं द्रष्टृसंज्ञां तदेवेति प्राप्नोति नान्यो जीवो नाम अस्ति नान्योऽतो
स्ति द्रष्टेत्यादिश्रुतेः यद्वा द्रष्टृव्यपदेशं द्रष्टृसंज्ञं जीवमपि तदेव प्रतिजानाति ननु जीवस्तत्तु जानातीत्य

सकलायेसात्वतपरिवृढास्तेषांनिकाः समहस्तस्यकरकमलानांकुड्मलेरुपलालितेचरणा
रविंदयुगलेयस्यतस्यसंबोधनेपरमरक्तुरूपरमेष्ठिन्सर्वेश्वरा २४ पूर्वसनाभदोगिरात्राजगामेत्य
तिराःप्राधान्येनोक्तः चित्रकेतोःपुत्रप्रदत्तेनतस्यदृष्ट्यागमेनात रहस्तेनारदोगिरस्साकंयथा
विनिनारदस्यप्राधान्यनिर्देशः तदुपदेशेनतस्यवैराग्योत्पत्तेः प्रभोर्हेसमर्थ २६ यथायथाव
द्धारयामास २७ विद्याधराधिपत्यंवावांतरफलंलेभे अप्रहतमस्खलितं २८ कतिपयाहोभिः

ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसकलसात्वतपरिवृढनिकर
करकमलकुड्मलोपलालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते २४॥श्रीशुकउवाच
भक्तायैतांप्रपन्नायविद्यामादिश्यनारदः ययावंगिरसासाकंधामस्वायंभुवंप्रभो २५ चित्र
केतुस्तुविद्यांतांयथानारदभाषितां धारयामाससप्ताहमब्भक्षःसुसमाहितः २६ ततश्च
सप्तरात्रांतेविद्ययाधार्यमाणया विद्याधराधिपत्यंसलेभेप्रतिहतंनृपः २७ ततःकतिप
याहोभिर्विद्ययेद्धमनोगतिः जगामदेवदेवस्यशेषस्यचरणांतिकं २८ मृणालगौरंशिति
वाससंस्फुरत्किरीटकेयूरकटित्रकंकणं प्रसन्नवक्त्रारुणलोचनावृतंददर्शसिद्धेश्वरमंड
लैःप्रभुं २९ तद्दर्शनध्वस्तसमस्तकिल्बिषःस्वच्छामलांतःकरणोभ्ययान्मुनिः प्रवृद्ध

विद्ययाश्लिष्टेनदीप्तेनमनसागतिर्यस्य २८ मृणालवद्गौरंशितिवाससंनीलांबरंस्फुरंतिकिरीटा
दीनियस्य कटित्रंकटिसूत्रंप्रसन्नानिवक्त्राणियस्यारुणानिलोचनानियस्यतैरावृतंच २९
हृष्टानमादिपुरुषमभ्ययाच्छरणंगतः अनमदनंतनामकंप्रभुं ततः तस्यदर्शनेनध्वस्तसमस्तकि।

३

२०

भा॰
ष॰
५५

तं प्रसमीडितुं चिरेनैवाशकत्‌ तत्र हेतुः उतम श्लोकस्य पदाब्जयोर्विष्टरभासनं उपमेहयनः अभिषिंचित्‌
प्रेमाणाउपरूढः अखिलानां वर्णानां निर्गमः उच्चारणं यस्य सः ३९ मनीषयाबुद्ध्या मनः समाधाय उपनद्धस्व
भावे प्रतिलब्धवाग्येन सोनंतगुणाज्ञो को विग्रहो यस्य तं अन्योन्यप्रेमजानंदतिम ज्यान्त्या मिसे
वकान्‌ अभिनंदनस्तदा स्तौति दृग्भिः पंचभिर्विभेहे अजित अन्यैर जितो पि भवान्‌ साधुभिर्भक्तैर्जि
तः स्वाधीनः कृतः यतो भवान्‌ अतिकरुणः ते पि निष्कामा अपि भवता यो भवान्‌ कामान्‌ आत्मनां आत्मन्यमे
वददाति ३३ ननु भक्तैरेव जितः इति कथं स्यादेतिदृश्यत अभिमन्त्याजगतानउद्ध्यादीनिनवैव विभवाः वि॰

सउत्तमश्लोकपदाब्ज विष्टरं प्रेमास्तु लेखेरुपमेहयन्मुहुः प्रेमोपरूढाखिलवर्णनिर्गमो नैवाश
कत्प्रसमीडितुं चिरं ३९ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ नियम्य सर्वे
द्रियवाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहं ३२ ॥चित्रकेतुरुवाच॥ अजित जितः सममतिभिः साधु
भिर्भवो जितात्मभिर्भवता विजितास्ते पि च भजतामकामात्मनां य आत्मदोति करुणः ३३ ने
व विभवः खलु भगवन्‌ जगदुदयस्थितिलयादीनि विश्वसृजस्ते ंशांशास्तत्र मृषा स्पर्धंति पृथग
भिमत्या ३४ परमाणुपरममहतोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः आदावंते च सत्त्वानां यद्ध्रुवं तदेवां

भवंतं महिमालीलेतियावत्‌ आदिशब्देन प्रवेशनियमादीनि विश्वसृजस्त्वब्रह्मादयोनेध्या यः किं तेन त
वौपयोः पुरुषस्तु तस्यांशांशास्तत्र एवं स्थितेपि पृथक्‌ पृथगीश्वरा वयमित्यभिमानेन तृथैवस्पर्धंते ३४ त
मेव सृष्ट्यादिकर्तृत्वेन तद्रूपपादयति परमाणुः सूक्ष्मस्तलकारणं परममहत्‌ अंतिमकार्यं तयोस्त्वमे
वाद्यंतांतरवर्ती आदावंते वावर्तितेशीलं यस्य सः अतएव त्रयविधुरः आद्यंतमध्यशून्यः ध्रुवः तेच दा
यास्तु तेन तद्ध्रुवः कुतः इत्यत आह सत्त्वानां सत्वेन प्रतीतानां कार्याणां आदावंते च यदध्रुवं तदेवमानम

एवंभूतत्वेन कालतः परिच्छेदो नास्तीत्युक्तं देशतोऽप्यपरिच्छेदमाह त्रिलोक्यादिभिरिति पूर्वस्मात्परद
शादगुणासृतनेरयिकैः राहूतः यत्रतयिग्रणकल्पः ग्रणतुल्पः पततिपरिभ्रमततन्तस्मादनंतस्त्वतः १७
यस्मादेवं परमेश्वरस्त्वमेवान्येदेवान्हि भ्रमयः ग्रतस्त्वां विहाय विषयकामतयान्योपासकाग्रतिमेदा इ।
त्याह विषयेति विषयेषु त्वदुःतस्मायेशानेनंतरं यथा राजकुलेस्त्र तु राजकुलेषां तेन तत्कारणः प्रभावः कु
तोये विभूतेर्मिद्रायायुपासनेनेन तु परं तोततः किंतत्राह तेषामिति तदनुपासनापानेनंतरं यथा रा
जकुलेस्त्रतु राजकुलनापानेनंतरं यथानसेवकानांप्राप्तिर्भवेतसंपत्तिनहत्व १८ ग्रयेयवपरमोऽवधिः

त्रिलोक्यादिभिरेवकिलावृतः सप्तभिः दशगुणोत्तरैर्ब्रह्मकोशः यत्र पतन्नणकल्पः सहोड्डकोटि
भिस्त्वदनंततः १७ विषयतर्षोनरपशावोयउपासतेविभूतीर्नपरं तां तेषामाशिषर्दुःशनदत्त
विनश्यंतियथाराजकुले १८ कामपियस्त्वयिरविनानपरमेरोहतियथाकर्मबीजानि।
ज्ञानात्मन्यगुणमयेगुणाणानोसङ्ग्रहजालानि १९ जितमजिततदाभवतायदाहभागव
तेधर्ममनवद्यं निष्किंचनायेमुनयग्रात्मारामायमुपासतेपवर्गाय ५०

मध्येविनश्यंत्येव विषयकामनाग्रपिहेपरमतयिरविनाः कृताग्रेततरोहतिदेहांतरोत्पत्तयेनभवं
तिकर्मबीजानिभर्जितबीजानियथायतोस्यजीवगुणगुणगणाटेवद्रसमूहाभवंतिग्रतःकामे
नापिनिर्गुणस्तत्वभजनाच्छनैर्निर्गुणभवतीत्यर्थः १९ किलकामतयापितदाराधनंयदासो
तहेतुः तदाकिंवक्तव्यंभागवतधर्ममाहात्म्यंवक्तुमितितत्संप्रदायप्रकर्तेकहेनचभागवतं
स्तौति जितमिति यदाभागवान् भगवतंधर्ममाहतदाभगवंस्त्वयाजितंसर्वोत्कर्षेणस्थितंत

वर्द्धेतः वर्द्धितः किंत्वनाग्रानयकमारःपेक्षतवषेत्यंवंतनमपवर्गोपवसेवंत्रे
तेनभगवानानितंजयमसिमिवा ५०

श्री भा ष ५

अनवद्यत्वमेवाह विषममतिर्न यत्र यस्मिन् भागवतधर्मे नास्ति यदन्यत्र यथान्यस्मिन् काम्यधर्मे न तु सोपि
वेदोक्तत्वादनवद्य एव तत्राह विषमधिया शत्रुमरणादिकामनया रचितो विहितो योऽसत्यविशुद्धः शत्रुद्रो
हादिमत्त्वात् क्षयिष्णुश्च नश्वरफलत्वात् अधर्मबहुलश्च हिंसादिबाहुल्यात् तदुक्तं शबरस्वामिभिः
श्येनस्य हि चोदनायां न लक्षणतोऽर्थोऽनर्थश्चेति ४१ एतत्प्रपञ्चयति कः क्षेमः किं कुशलं न किंचित् निज
परयोः स्वस्य परस्य च स्वपरद्रुहा तस्यैव द्रुह्यतीति स्वपरध्रुट् तेन यतः स्वद्रोहात् अन्येन कायक्लेशा

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्रापि विषमधिया रचितो यः स ह्यविशु
द्धः क्षयिष्णुरधर्मबहुलः ४१ कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण स्वद्रोहात्तव
कोपः परसंपीडया च तथाऽधर्मः ४२ न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः स्थि
रचरसत्त्वकदम्बेष्वपृथग्धियो यमुपासते त्वार्याः ४३ न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणा
मखिलपापक्षयः यन्नामसकृच्छ्रवणात्पुक्कसोऽपि विमुच्यते संसारात् ४४

त्तव कोपः पीडा संभवति तदुक्तं गीतासु कर्षयन्तः शरीरस्थं भूतग्राममचेतसः मां चैवान्तःश
रीरस्थं तान्विद्ध्यासुरनिश्चयानिति ४२ तथा परसंपीडया अधर्मः च शत्रुहा तव कोपश्च अनन्त त्वया
नृणां धर्मोऽपि कथं विद्वेषमार्गेण प्रवर्तयितुं काम्यधर्मोऽभिहितो न तत्र तवेच्छा भागवतधर्मेणानन्त त
द्रोह इत्याह न व्यभिचरति न परमार्थं जहाति तवेक्षा दृष्टिः अव्यभिचारे हेतुः स्थिरे तिष्ठा वरं जंग।
मप्राणिसमूहेष्वसमबुद्धयो भागवतनायं धर्ममुपासते ४३ एवंभूतस्य भागवतधर्मप्रवर्तकस्य तव ५.
दर्शनात् सर्वपापक्षयो भवतीति किं चित्रमित्याह नहीति ४४

अहो अलोहं कृतार्थो स्मीत्याह द्वाभ्यां इति अतो हेतोः तवावलोकनेन परिमृष्टा निरस्ता आशयेषु चित्तेषु म
लाये षां ते तव दर्शनेन च समनारदोपदेशेन ज्ञातमित्याह स्वरूषिणेति ४४ यथा चाहं पूर्वमतिमूढ आ
सं यथा च नारदेनानुगृहीतो स्मि तत्सर्वं तस्य यो मां सर्वं मायाकिं प्रकाशनीयमित्याह विदितमिति वि
श्वेषु प्राणिषु प्रकाशनीयं किंयदिव न किमपीत्यर्थः सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरऋषिणा यदुदितं तावकेन कथ
मन्यथा भवति ४५ विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितं विज्ञाप्यं परमगु
रोः किं यदिव सवितुरिव खद्योतैः ४६ नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशा
य दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ४७ यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं
चेकितानमनु चित्तय उच्चकन्ति भूमण्डलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्र
मूर्ध्ने ४८ ॥श्रीशुक उवाच॥ संस्तुतो भगवानेवमनन्तस्तमभाषत विद्याधरपतिं प्रीतश्चित्रके
तुं कुरूद्वह ४९ ॥श्रीभगवानुवाच॥ यन्नारदाङ्गिरोभ्यां ते व्याहृतं मेऽनुशासनं संसिद्धोऽसि तया
राजन्विद्यया दर्शनाच्च मे ५०

त उक्तलक्षणं भगवन्तं प्रणमति नम इति द्वाभ्यां सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय
दुरवसिता अविज्ञाता आत्मगतिर्निजं तत्त्वं यस्य तस्मै के षां कुयोगिनां कया क्रियया भिदा भेददृ
ष्ट्या ४७ श्वसन्ति चेष्टन्ते चेकितानं पश्यन्तमनु चित्तयः ज्ञानेन्द्रियाणि उच्चकन्ति सारूपं पश्यन्ति
४८ मेऽनुशासनं मद्विषयमुपदेशः तेन तया च विद्यया अस्मद्दर्शनात्संसिद्धोऽसि ५०

बोधदार्ढ्यं स्वयमेवोपदिशति अहमित्यादिना सर्वभूतान्यहमेव भूतानामात्माभोक्ताप्यहमेव भोक्तृ-
भोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः यतोऽहं भूतभावनः भूतानां प्रकाशकः कारणं च ५० ननु श-
ब्दब्रह्मप्रकाशकं परब्रह्मकारणं च सत्यं ते उभे ममैव रूपे इत्याह शब्दब्रह्मेति शाश्वती शाश्वत्यौ अन-
न्ते ममैव वपुषी इत्याह लोके भोगप्रपंचो भोक्तृत्वेन विततमनुगतमात्मानं लोकं चात्मनि भोग्यत्वेन संततं
व्याप्तं ननूभयं च मया कारणात्मना व्याप्तं मयि चोभयं कृतं कल्पितं स्मरेदित्यन्वयः पश्येति व्याहा-
रो वा ५१ ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याश-

अहं वै सर्वभूतानि भूतात्मा भूतभावनः शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ५० लोके वितत-
मात्मानं लोकं चात्मनि संततं उभयं च मया व्याप्तं मयि चैवोभयं कृतं ५१ यथा प्रसुप्तः पुरुषो वि-
श्वं पश्यति चात्मनि आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ५२ एवं जागरणादीनि जीवस्था-
नानि चात्मनः मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ५३ येन प्रसुप्तः पुरुषः स्वापं वेदात्म-
नस्तदा सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां ५४

ङ्क्य स्वप्नगते जाग्रदादिदृष्टान्तेन साधयन्नाह यथेति द्वाभ्यां यथा स्वप्ने प्रसुप्तः विश्वं गिरिवनादिरूपं देशान्तर-
स्थमात्मन्येव पश्यति स्वप्नमध्ये स्वबुद्धिं स्वप्नं च पश्यतीत्यर्थः तथा स्वप्नादुत्थितः सन्नात्मानमेक-
देशस्थं शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ५२ एवं जागरणादीनि जीवस्थानानि जीववृत्तीर्बु-
द्धेरवस्था आत्मनो मायामात्राणीत्येवं विज्ञाय तेषां तद्द्रष्टारं अतएव परं तदवस्थारहितं आत्मानं स्मरेत् ।
ननु तेषां द्रष्टारमिति कथमुच्यते ५३ स्वापे द्रष्टृत्वाभावेन दृष्टृत्वाभावादित्याह येनेति सुप्तः पुरुषो जी-
वः येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि

ननु स्वापस्मातिशयाद्देहं कथं जाग्रदवस्थः स्मरेत् न ह्यन्येन दृष्टमन्यः स्मरतीति तत्राह उभयं स्वापप्र
तिबोधयं च स्मरतः अनुसंदधतः तयोः स्वापप्रतिबोधयोः प्रकाशकत्वेन तदन्वेति ताभ्यां व्यतिरिच्ये
त च एकैकापायेऽप्यनपायात् तत् ज्ञानं परं तदेव तत्तु भिन्नमित्यर्थः अतो बाल्ये दृष्टस्य यौवने स्मृति
वदवस्थांतरत्वेऽपि स्वापजाग्रदयोः स्मरणाद्घटत इति भावः तदेवंभूतमात्मानमवेहीति तृष्णाः वि
पक्षे दोषमाह यद्यदिष्टतमं ज्ञानं मम स्वरूपं ब्रह्म विस्मृतं आत्मनः सकाशाद्भिन्नं भवति त

उभयं स्मरतः पुंसः स्वापप्रतिबोधयोः अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परं ५६ यदेत
द्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ५७ लब्ध्वेह
मानुषीं योनिं ज्ञानविज्ञानसंभवाम् आत्मानं यो न बुद्ध्येत न क्वचित् क्षेममाप्नुयात् ५८
स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययं अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः
५९

तद एतस्य पुंसः संसारो भवति संसारस्वरूपमाह देहाद्देहं जन्मांतरं पुनर्जन्म मृतेरनंतरं पुनर्मृ
तिश्चेति ५६ योन्यंतरेषु विभागाद्दिसंपादनेऽशक्यं ज्ञानार्थं तत्रैव यतितव्यमित्याह लब्ध्वेति ज्ञा
नं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवो यस्यां ता ५८ वैराग्यार्थमाह ईहायां प्रवृत्तिमार्गे तत
ईहातः अनीहायां अप्रवृत्तिमार्गे तु अभयं मोक्षो भवतीति च स्मृत्वा फलसंकल्पाद्विरमेत् अ
पाठांतरे जायपरिक्लेशः फलविपर्ययश्चानात्मीयत्वेन स्मृत्वा ५९ ॥

एतद्धि हृण्गोति सत्वायेति त्रिभिः उः स्वप्ना त्रिवृतिः सत्वस्याप्यपि ५९ यदुग्रमे प्रवीणावयमित्यभि
मानवभंस्थानत्रयविलक्षणो तुरीयांवुद्धौ ६० दृष्टश्रुताभिर्मात्राभिः ऐहिकामुष्मिकविषयैः स्वेन।
तेजसा विवेकबलेन ६१ नचान्तः परं प्रकृत्वार्थोऽस्तीत्याहृ एतावानिति योगनैपुण्यं यस्मात्सा बुद्धिर्येषां।

सत्वायतः क्षेमोत्पाय कुर्वीत दंपतीक्रियो ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ५९ एवं विप
र्ययं बुद्धान्यणो विज्ञाभिमानिनां आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां ६० दृष्टश्रुता।
भिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत् ६१ एतावानेव मनुजै
र्योगनैपुण्यबुद्धिभिः स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ६२ त्वमेतच्छ्रद्धया राजन्नप्रम
त्तो वचो मम ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिद्ध्यति ६३ ॥श्रीशुक उवाच॥ आश्वास्य भगवानि
त्थं चित्रकेतुं जगद्गुरुः पश्यतस्तस्य विश्वात्मा ततश्चान्तर्दधे हरिः ६४ ॥इति श्रीभागवते महा
पुराणे षष्ठस्कंधे चित्रकेतुसप्ताख्याने षोडशोऽध्यायः १६॥ श्रीशुक उवाच॥ यतश्चान्तर्हितो नन्तस्तस्यै।
कृत्वा दिशे नमः विद्याधरश्चित्रकेतुश्चचार गगनेचरः १ स लक्षं वर्षलक्षाणामव्याहतबलेन्द्रि
यः स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः २ कुलाचलेन्द्रद्रोणीषु नानासंकल्पसिद्धिषु
रेमे विद्याधरस्त्रीभिः गापयन्हरिमीश्वरं ३ अकस्मादद्भुतैश्वर्यगर्वो प्राचीनकर्मतः आसुरी
योनिमापत्स्यमानो प्राप्तनः सन् ४ स एकदा विमानेन विष्णुदत्तेन भास्वता गिरिशं ददृशे गा।

परस्यात्मनः एकं दर्शनमिति यदेतावानेव ६३ ॥इति श्रीभागवते षोडशः॥१६॥ ततः सप्तदशे मो
योमहद्भिः प्राप्यैवेचरन् विहस्य गिरिशं प्राप पार्वत्याहृततागतः यतः यस्यां दिशि तस्यै नमः कृत्वा न
ता १२ स विद्याधरः स्त्रीभिर्हरिं गायमानो रेमे इति द्वयोरन्वयः अव्याहतबलमिन्द्रियपाटवं च य।

अंकीकृतां स्वांगेनैकीकृत्य देवीं बाहुनाश्लिष्य स्थिते उवाच जहास च तस्यांतिके स्थितः सन्
६ धर्मं वक्ता वदति शरीरिणां मध्ये मुख्यः भार्यया मिथुनीभूय चास्ते ७ ९ अगाधा गंभीरा धीर्यस्य
सः ९ न तस्य वीर्यप्रभावं विदुषि अवस्थिते निर्जितात्माभिमानिने जितेंद्रियोऽहमित्यभिमानवते
अतिधृष्टाय क्रोधेनाह ११ विप्रकृत् विप्रकर्षणं करोतीति विप्रकृत् १२ अतिवर्तिनं शास्त्रमतिक्रम्य वर्तं

चित्रकेतुरुवाच॥ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणां आस्ते मुख्यः सभायां वै मिथुनी
भूय भार्यया ५ आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि उवाच देव्याः शृण्वत्या जहासो
च्चैस्तदंतिके ६ जटाधरस्तीव्रतपा ब्रह्मवादिसभापतिः अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृ
तो यथा ७ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति अयं महाव्रतधरो बिभर्ति सदसि स्त्रि
यं ८ **॥श्रीशुक उवाच॥** भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप तूष्णीं बभूव सदसि सभ्याश्च
तदनुव्रताः ९ इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनं रुषाह देवी धृष्टाय निर्जितात्माभिमा
निने १० **॥देव्युवाच॥** अयं किमधुना लोके शास्ता दंडधरः प्रभुः अस्मद्विधानां दुष्टानां निर्जि
तानां च विप्रकृत् ११ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः न वै कुमारः क
पिलो मनुश्च ये नो निषेधंत्यतिवर्तिनं हरं १२ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंग
लं स्वयं यः क्षत्रबंधुः परिभूय सूरीन् प्रशास्ति धृष्टस्तदयं हि दंड्यः १३ नायमर्हति वैकुंठपा
दमूलोपसर्पणं संभावितमतिः स्तब्धः साधुभिः पर्युपासितं १४ अतः पापीयसीं योनिमासु

न शीलये नो निषेधंति निवारयंति १२ सूरीन् परिभूय ज्ञानेन कृत्वा जगद्गुरुं यः प्रशास्ति तस्मात् १३ न
नु हरिभक्तोऽयं न दंडार्हः इति चेत्तत्राह नायं साधुभिः परिसेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति

आलिंग्यांकीकृतां देवीं बाहुना मुनि संसदि ॥उवाच देव्याः शृण्वत्या जहासोच्चैस्तदंतिके ॥२

रीं याहि दुर्मते यथेह भूयो महतां न कर्ता पुत्र किल्बिषं १५ २

भा॰
ष॰
५३

पूर्वदिष्टं प्राचीनकर्मसंग्राममेवायं च १८ अतएवममतवचनकोपि दोषइत्याह नैवेति १९ एवं सुखादिक
मीहृत्योक्तं २० यदानीं न दृष्टिवस्तुतो नास्तीत्याह २१ गुणानां मायास्यात्तत्राह एकः परमेश्वरो मायया
निमित्तभूतया भूतानि प्राणिनः सृजति एषां बंधादिकं च सृजति निष्फलः स्वयं बंधादिशून्यः २२ न
नेवं भूतविषमसृष्टेर्न स्यकिंकारप्रियादिवैषम्याभावादित्याशंक्य यद्यपि प्रियादयो न संति तथापि
नतत्कर्मैव प्राप्तं सर्वं चेटनतत्याह नतस्येति द्वाभ्यां प्रतियोप्रियः नज्ञातिर्बंधुः स्वार्थः नच हेतुः स

चित्रकेतुरुवाच॥ प्रतिगृह्णामिते शापमात्मनोंजलिनांबिके देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं तदस्य
नतस्यतत् १८ संसारचक्र एतस्मिंजंतुरज्ञानमोहितः भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्व
दा १९ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः कर्तारं मन्यते प्राज्ञः आत्मानं परमेव च २०
गुणप्रवाह एतस्मिन्कः शापः कोन्वनुग्रहः कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा २१
एकः सृजति भूतानि भगवानात्ममायया एषां बंधं च मोक्षं च सुखं दुःखं च निष्कलः २२ न
तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः समस्य सर्वत्र निरंजनस्य सुखेन रागः कु
तएवरोषः २३ तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय बंधाय मोक्षाय
वमृत्युजन्मनोः शरीरिणां संसृतये च कल्पते २४ अथ प्रसादये न त्वां शापमोक्षाय भामिनि

वत्रसमस्यतत्कुतः निरंजनस्य निःसंगस्यात एव तन्निमित्ते सुखे रागो नास्ति रागाभावे यो रोषः कुतः स्या
त् २३ यद्येवं तथापि तस्य शक्त्या मायया विसर्गः पुण्यपापादिलक्षणं कर्म एषां शरीरिणां सुखाय यत्ं म
वकल्पते समर्थो भवंति तदुक्तं गीतासु भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति २४ अथ न त्वां प्रसा
हे भामिनि कोपने त्वां केवलं प्रसादयामि नतु शापमोक्षाय किं प्रसादनेनातआह मतोक्तं साध्व्यसा

[illegible] २५

श्री

२५
[illegible] ५३

गिरीशो भवानीशंकरो प्रसादयस्मयतोः विस्मयं कुर्वतोः तयोः २६ २७ २८ स्वर्गादावपि तुल्यार्थः प्रयोजन
मिति दृष्टुं शीलं येषां तेन तथा २९ तत्र तदुक्तमेव हेतुद्वयमहङ्काराभ्यां देहिनां सर्वज्ञः त्वमित्यादि देहीनि
ईश्वरस्य लीलया मायया भवंति ३१ तेषु गुणत्रय दोषविकल्पस्त्येवान्वयः ईश्वर निष्प्रभेद बुद्धयः स्फुरति
आत्मन्यर्थभेदः सत्वादिभेदः पुंसां सम्भेयथा अविवेककृतो भवति रज्जिव सर्पमालादिभिदायथा त

श्रीशुक उवाच॥ इति प्रसाद्य गिरिशौ चित्रकेतुररिंदम जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः
२९ ततस्तु भगवान् रुद्रो रुद्राणीमिदमब्रवीत् देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वतो ३०॥ **श्री
रुद्र उवाच॥** दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः माहात्म्यं भृत्यभृत्यानां निस्पृहाणां महात्म
नां २८ नारायणपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः २९ दे
हिनां देहसंयोगाद्द्वंद्वानीश्वरलीलया सर्वज्ञः स्वमतिर्वह्नितः ३१ वासुदेवे भगवति भक्ति
मुद्वहतां नृणां ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ३२ नाहं विरिंचो न कुमारनारदौ न
ब्रह्मपुत्रा मुनयः सुरेशाः विदाम यस्येहितमंशकांशकाः न तत्स्वरूपं पृथगीशमानिनः ३३ न
ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ३४

वेव कृतरूपत्वर्थः स्वगवदिति आर्षपाठोत्तरत्र सुगमं ३१ अतो भागवतानां निःस्पृहत्वमुचितमेवेत्याह
वासुदेव इति ज्ञानवैराग्ययोर्वीर्यं वलं येषां तेषां व्यपाश्रयो विशिष्ट आश्रयः प्राप्यः ईश्वरांशो नास्ति ३२
इति तमभिप्रायं लीलोवायवर्णयं न विद्मः नतस्य स्वरूपं अंशकांशकाश्च पिसन्तः पृथगीशमानिनःन
विदुरेव ३३ अत एव हरिरपि सर्वेषां भूतानां प्रियः ३४ ॥

जन्मशापोनुग्रह
एव च ईश्वर विवेक
कृतः पुंसो त्वर्थभेद
इवात्मनि॥ गुणदोष
विकल्पश्च भिदेवस्र
जि

अहं चैवाच्युतप्रियः तस्मान्ममास्मिन्क्रोधो नाभूदिति भावः ३५ ३७ प्रतिशापं दातुमलंतमः समर्थ त
मोपि ३८ ३९ असुरजातेः असुरस्वभावो नोत्पत्तेः भगवति मतेश्च ४० ४१ एतत् एते ४२ ॥ इति श्री

तस्य चायं महाभागश्चित्रकेतुः प्रियोनुगः सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः ३५ तस्मान्न
विस्मयः कार्यः पुरुषेषु महात्मसु महापुरुषभक्तेषु शांतेषु समदर्शिषु ३६ ॥श्रीशुक उवाच॥ इ
ति श्रुत्वा भगवतः शिवस्योमाभिभाषितं बभूव शांतधी राजन्देवी विगतविस्मया ३७ इति भागव
तो देव्याः प्रतिशापमलंतमः मूर्ध्ना स जगृहे शापमेतावत्साधुलक्षणं ३८ जज्ञे त्वष्टुर्दक्षिणाग्नौ दा
नवीं योनिमाश्रितः वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ३९ एतत्ते सर्वमाख्यातं यन्मां त्वं प
रिपृच्छसि वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ४० इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः
माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ४१ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् इ
तिहासं हरिं स्मृत्वा स याति परमां गतिं ४२ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे चित्रकेतूपा
ख्याने सप्तदशोऽध्यायः १७

भागवते महापुराणे षष्ठस्कंधे भावार्थदीपिकायां सप्तदशोऽध्यायः १७ ॥ ॥

आदित्यानां च त्वष्टुश्च वंशं वर्णयन् प्रसंगतः प्रोक्तमिंद्रकृतं सर्वं विश्वरूपवधादिकं अदितेः पंचमादीनां।
पुत्राणामन्वयोक्तितः अष्टादशोदितेर्गर्भ शक्रेणामरुतो भिदा तदूर्ध्वं शमनक्रमप्रसंगेन यथाक्र
मं आदित्यानामथान्येषां वंशानाह मुनीश्वरः दक्षकन्यातनयानकथने आदित्याद्वादशपुत्राःप्रो।
क्ताः विवस्वानर्यमापूषात्वष्टाथसविताभगः धाताविधातावरुणोमित्रःशक्रउरुक्रमइति तत्र प
ष्ठाध्यायेनमारभ्यविश्वरूपाविवेकेनत्पाध्यायेनैः तदूर्ध्वंशमनुवर्ण्येदानींसवितृवंशमाह पृश्नि
स्त्विति सावित्रीमिदादिशुप्रासूतेतेनतास्यानुषंगः पशुपशुयागंमहामखान् १। २ धातुर्भार्या

श्रीशुक उवाच॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीं अग्निहोत्रं पशुं सोमं चातुर्मास्यं म
हामखान् १ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुं आशिषं च वरारोहां कन्यां प्रासूत सुव्र
ता २ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा सायं दर्शमथ प्रातः पूर्णमासमनुक्रमा
त् ३ अग्नीन्पुरीष्यानाधत्त क्रियायां समनंतरः वर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः
४ वाल्मीकिश्च महायोगी वाल्मीकादभवत्किल अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोरृषी
रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतं रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ६
कुहूः सायं पुत्रं प्रसूते एवं सिनीवाली दर्शमित्यनुक्रमात् ३ समनंतरो विधाता क्रियायां स्वभार्यायां पुरी
षाननुग्नीन् पंच वितीपुरीषान् सोग्न्यर इति पंच वाते ग्रयो यश्चिन्ता इति श्रुतेः वर्षणी वरुणस्य भार्या आसीत्
पूर्वं ब्रह्मणः पुत्रः भृगुर्यस्यां पुनः जातः ४ वाल्मीका द्वरुणस्यैव पुत्रोऽभवत् एतौ वरुणस्यासाधारणौ
तयोस्तर्गोदयो मित्रस्यासाधारणाः तयोरेव साधारणौ द्वौ पुत्रावाह अगस्त्यश्च वसिष्ठश्च ऋषी मि
त्रावरुणयोः अभवतां ५ अनयोरभावपि कुंभे रेतः सिषिचतुः सद्वेहजाना विधिना नामोक्तिः कुंभे

रेतः सिषिचतुः सत्र मित्राः सिषिचतुः कृतं ८

१८ पश्चात्सप्तमस्कंधे ९ ९ हिरण्यकशिपुर्हिरण्याक्षश्चेति प्रथमं द्वावेव वचनौ कीर्तितौ तत्तीयस्कं
धे ११ १२ विप्रचित्तिर्दानवाङ्गतुः सकाशात्राहुं पुत्रमग्रहीत २३ ततः संह्लादादस्तत २४ योमेषस्पर्वाता

योलोम्यामिंद्रस्यात्ततनौव्रतातितिनः श्रते जयंतमृषभंतातततीयमीढुषंप्रभु १ उरुक्रमस्यदे
वस्यमाययावामनरूपिणः कीर्तौपत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ८ ततकर्मगुणवीर्या
णिकाश्यपस्यमहात्मनः पश्चाद्वक्ष्यामहेदित्यां यथैवावततारह ९ अथकश्यपदायादान्दैते
याकीर्तयामितेयत्रभागवतः श्रीमान्प्रह्लादोबलिरेवच १० दितेर्द्वावेवदायादौ दैत्यदानववं
दितौ हिरण्यकशिपुर्नाम हिरण्याक्षश्चकीर्तितौ ११ हिरण्यकशिपोर्भार्याकयाधुर्नामदानवी
जंभस्यतनयादत्तासुषुवेचतुरः सुतान् १२ संह्लादंप्रागनुह्लादं प्रह्लादंह्लादमेवच तत्स्व
सासिंहिकानामराहुंविप्रचित्तितोग्रहीत १३ शिरोहरद्यस्यहरिश्चक्रेणपिबतोमृतं संह्लादस्या
कृतिर्भार्यासूतपंचजनंततः १४ ह्लादस्यधमनिर्भार्यासूतवातापिमिल्वलौ योगस्त्यायत्वति
थयेपेचेवातापिमिल्वलः १५ अनुह्लादस्यसूर्म्यायांबाष्कलोमहिषस्तथा विरोचनस्तुप्र
ह्लादिर्देव्यांतस्याभवद्बलिः १६ बाणज्येष्ठंपुत्रशतमशनायांततोभवत् तस्यानुभावः सुश्लोक्यः
पश्चादेवाभिधास्यति १७ बाणआराध्यगिरिशंलेभेतद्गणमुख्यतां यत्पार्श्वेभगवानास्तेह्य
द्यापिपुरपालकः १८

पिंपेचेतंइल्वलंयंपेपेचेतंवातापिंचासृजतेत्यन्वयः १५ १६ तस्यानुभावः अनुभावः अनुभवनं सुश्लोकः
गुणकीर्त्यार्हः यद्वा अनुभाव्यतेसद्भिः स्तूयतइत्यनुभावः सुश्लोकेरुणइतिशेषः १७ तस्यगुणेषु

॥ ५८

५५

सान्मनोऽसमानरूपत्वाद्देवत्वं प्रापिताः ॥ १९ ॥ २१ आहत्वं मादृशं मन्ये मितादरं अर्थवद्दृश्यं पुत्रं मे सत्तमयन।
मामयोयस्यदेहस्त्रायणशौनक ॥ २२ ॥ पार्श्वग्राहेन दृष्टतः सहायेन ॥ २३ ॥ रक्षणं कृतं मे लिङ्गं हृदयं कवि
नर्वितं ॥ २४ ॥ ननु राजा स्वदेहरक्षणार्थं मन्ये पाद्मानं कृतोऽन्येव किमत्र वित्तं तत्राह क्रिमीति इंशः प्रभा
तिन्यमिहितस्यापियस्य पूर्वैषां राजदेहस्य मरणान्तरं द्वित्रिदिनावस्थितस्य क्रिमयः तिष्ठादिभिर्भक्षि
महत्तमस्मृदितैः पुत्रा अश्नन्तारिं शत्रुवाधिकाः तस्मात्स्वप्रजाः सर्वे नीताः दूरेण सान्मनो ॥ १९ ॥ राजो
वाच ॥ कथं तत्र आसीत् भावस्य पोषोऽन्यतिकं गतो दूरेण प्रापिताः साम्प्रतं किं तत्सार्थकृते हितैः ॥ २० ॥
इमे अहं धनेन स्वजनं रक्षयो हि मया सह पशिताना यभावेत्तत्रो व्याख्यातम हेसि ॥ २१ ॥ सूत उवाच ॥
तद्विलरणतस्य सवादनाय गीर्वे गोनि शम्याद्दत्तमल्पमर्थवत् सभाजयन्संनिभृतेनचेतसा जा।
गादस्त्रायणाय सर्वदर्शनः ॥ २२ ॥ श्रीमृकण्डउवाच ॥ हन्त पुत्रादिति शङ्कपार्श्वग्राहेन विस्मिता म
स्तुना शोकदीमेन ज्वलंती परिविनयत् ॥ २३ ॥ कदाचन्ध्यानसंस्थाः मिं द्वियाणामस्वल्पणो अलि
नहृदयं पापं गानयिनाशायेस्तवे ॥ २४ ॥ क्रिमिविद्भस्मसंज्ञा तीयस्येशाभिहितस्य च भजन्भुक्त
त्वेन स्वार्थं न वेद निर्ययोपतः ॥ २५ ॥ आशास्यान स्य तस्यदेवं पुवमन्त्र इचेनसः मदशोषकं दृश्यम
वाधेन स्तुनोहिमे इतिभावेन सामर्जुरावचाराम् स कृतप्रिय शुभ्रस्वया वरागोपाम श्रायेण दमेन
च भजमाय रमणा राजन्मनो नैवल्लभाषितैः मनोजग्राहभावं तासस्मितापाङ्गवीक्षणैः ॥ २८ ॥
तस्मात्वं हेतिदायस्य भस्मेति संज्ञा आसीत् तत्कृतेन स्वदेहस्यार्थं योमतेभ्योदृष्टानि स किं स्वार्थं वेदन
वेदेति ॥ २५ ॥ इहदेहादिकं ध्रुवं नित्यं आशासान स्य मन्यमानस्यात उत्रइमङ्कलं चेतो न चेद्दृश्य योम
टः तस्य पौत्रकः पुत्रो मे येन हेतुना भयात् ॥ २६ ॥ प्रियावराणामेवेति भावेन सामर्ते प्रियमसकृदाव चा

वक्तिमानहृदयं विवशोऽनगतियुद्भिर्भांति योविता

विकारा मृत्त्वा अ मृत्युविद्भागविद्वासना

विप्राः त्रिसंख्याः सत्कर्तुमनो वोत्तुमश्रियामशिक्याः लोवेकाते ॥ २५

भा॰
ष॰
५६

एकांतभक्तानिवृत्तिः संगानि मैथुनेन सह क्षिवृद्ध्यर्थं स्वदेहार्धं शिवस्त्रियं चक्रे ११ एवं शुश्रूषितः सन् क
श्यप उवाच ॥ इह कारणत्यागेन चाग्न्यः अप्राप्यः ननु परमेश्वरे सुप्रीते सर्वकामाप्तिरिति प्रसिद्धं तत्राह
पतिरेवेति १२ ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवतमिति प्रसिद्धं सत्यं स एव स्त्रा

त्रिलोकैकांतभक्तानि भक्तान्यादौ प्रजापतिः स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता ११ एवं
शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ११ वरं वरये
वामोरु प्रीतस्तेहमनिंदिते स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः १२ पतिरेव हि नारी
णां दैवतं परमं स्मृतं मानसः सर्वभूतानां वासुदेवः श्रियः पतिः १३ स एव देवतालिंगै
र्नामरूपविकल्पितैः इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् १४ तस्मात्पतिव्रता ना
र्यः श्रेयस्कामाः सुमध्यमे यजंतेनन्यभावेन पतिमात्मानमीश्वरं १५ सोहं त्वयार्चितो भ
द्रे ईदृग्भावेन भक्तितः तत्ते संपादये काममसतीनां सुदुर्लभं १६ ॥ दितिरुवाच ॥ वरदो यदि
मे ब्रह्मन्पुत्रमिंद्रहणं वृणे अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ १७

धिकारेणानुरूपभेदैः पूज्यत इत्याह मानस इति सार्धेन १३ देवतानां लिंगैर्मूर्तिभिरुपलक्षितैः ना
म्नेवाह नामरूपादिरूपं वज्रहस्तादितत्तद्विविधं कल्पितैः १४ १५ इंद्रहणमिंद्रहंतारं अमृ
त्युम् मृत्युशून्यं येनेंद्रेण विष्णुना सहायेन १७

३८ ३९ स्वभावमनुवर्तमानाया योषितः को ऽतिक्रमो ऽपराधः स्वभावमेवाहुस्त्वाभ्यां ४० प्रारब्धमो ऽस्त्वेवं ज्ञस्य
वो विकारो यस्मिन्नश्रवणमस्तु तस्या धारो मम चेतः ४१ साक्षिणां मनो ना स्वयं कामनयात्मवन्मो हितेन प्र
तीयमानानां ४२ न चेदमुपकल्पते यो ऽयं भवति ४३ अयं भावः वैष्णवं व्रतं तावदुपवेत्तामिति नेवा।
स्याः पुष्टिः इदं कुर्वन्निवर्तिष्यते पुत्रस्तमत्यो भविष्यति दीर्घकालं तेन च व्रतस्य कथंचिद्विघ्नो ऽपि सति

निष्फलमनुष्ठितो विप्रो विमनाः पर्यतप्यत अहो अधर्मः सुमहानयमेसमुपस्थितः ३८ अहो य
चेन्द्रियारामो बोधिन्नमहमायया गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवं ३९ को ऽतिक्रमो ऽनु
वर्तन्त्याः स्वभावमिह योषितः धिङ्मां वताबुधं स्वार्थे यदहं त्वजितेन्द्रियः ४० प्रारब्धमो ऽस्त्वेवं वा
क्यं वच प्रश्रवणमस्तु हृदयं तु त्वयाभजः स्त्रीणां को ऽववदत्वोहितं ४१ न हि कश्चित्प्रियः स्त्रीणा
मञ्जसास्वाशिषात्मनो पतिपुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च ४२ प्रतिश्रुतं ददामीति वच
स्तन्नमृषा भवेत् वधं नार्हति चेन्द्रो ऽपि तत्रेदमुपकल्पते ४३ इति संचिन्त्य भगवान्मारीचः कु
रुनन्दन उवाच किंचित्कुपित आत्मानं च विगर्हयन् ४४ कश्यप उवाच॥ पुत्रस्ते भविता भद्रे इ
न्द्रहादेवबान्धवः संवत्सरं व्रतमिदं यद्यञ्जो धारयिष्यसि ४५ दितिरुवाच॥ धारयिष्ये व्रतं ब्रह्मन्
ब्रूहि कार्याणि यानि मे यानि चेह निषिद्धानि न व्रतं घ्नन्ति यानि तु ४६ न हिंस्याद्भूतजातानि न
शपेन्नानृतं वदेत् न छिन्द्यान्नखरोमाणि न स्पृशेद्यदमङ्गलं ४७ नाप्सु स्नायान्न कुप्येत न सं
भाषेत दुर्जनैः न वसीताधौतवासः स्रजं च विधृतां क्वचित् ४८ नोच्छिष्टं चण्डिकान्नं च सामि

इदं स्म वचो न भविष्यतीति संचिन्त्य उवाच ४४ न शापेनाक्रोशेन यदमङ्गलं कपालास्थ्यादिकं न स्पृ
शेत् ४५ नाप्सु प्रविश्य स्नायात् पूर्वं विधृतां स्रजं पुनर्धारयेत् भोजने पञ्च निषेधानाह ४६
वैदिकान्नं भद्रकाल्यै निवेदितं सामिषं पिपीलकादिदूषितं अञ्जलिना ... यो न पिबेत् गृहाद्बहि

नापराकृपश्रिमशिराः कार्योण्णाहृयौनवासारुतिष्ठाम्यां ५९ प्रातराष्मात्प्रथमभोजनात्पूर्वे ५० वी
भा० रवतीजीवद्गेनकाः स्वर्चास्तं पूज्यकोष्ठगातेकुदेरतरोते ५१ पुंसवनप्रत्नोन्पतिकारंतुभ्यंतव ५२ ५५
प० हरिरिंद्रः व्रतस्यछिद्रं प्रेप्सः प्राप्नुमिच्छुः जिस्नः कुटिलः सायुवेष्ठः स्नगयालब्धकोयथामरगावचनाय
५७

नायोनपादाप्रथनानाईपात्रोटकशिराः प्राचीननापराह्णेर्नेनस्नानिशिसंध्ययोः ५९ यौ
नवासाः शुचिर्निसंसर्वमंगलसंयुना पूजयेत्प्रातरप्राह्णगोविप्रांश्रियमच्युते ५० श्रि
योवीरवतीश्चार्चेत्सगंधबलिमंडनैः पतिंचार्चोपतिष्ठेतध्यायेत्कोष्ठगतंचतं ५१ सोवत्सा
रंपुंसवनंव्रतमेतदविप्लुते धारयित्वासिचेत्तुभ्यं शक्रुहाभविनास्तुतः ५२ बाढमित्यभिप्रे
त्याथदितीराजन्महामनाः कश्यपाद्गर्भमाधत्तव्रतंचाजोटथारसा ५३ मातृष्वसुरभिप्रा
यमिंद्रआज्ञायमानद शुश्रूषणेनाश्रमस्थांदितिंपर्यचरत्कविः ५४ नित्यवनात्सुमनसः
फलमूलसमित्कुशान् पत्रांकुरंमृदापश्च कालेकालउपाहरत् ५५ एवंतस्याव्रतस्था
इच्छानात् ६१ यावनछिद्रंहरिन्तप प्रेप्सःपर्यचरज्जिह्मोमृगहेवमृगाकृतिः ५६ नाध्यगछद्व्रतेछिद्रं
तत्परोथमहीपते चिंतांतीव्रांगतःशक्रः केनमेस्याछिवंत्विह ५७ एकदासातुसंध्यायाम
उछिष्टाव्रतकर्षिता अस्पृष्टवार्यधौतांघ्रिःसुष्वापविधिमोहिता ५८ लब्ध्वातदंतरंशक्रो
निद्रापहृतचेतसः दितेःप्रविष्टउदरंयोगेशोयोगमायया ५९ चकर्तसप्तधागर्भवज्रेणक

स्नावेषोभवतियद्धत ५६ केनमेश्रिवेस्यादितिचिंतांप्रागमः ५७ अस्पृष्टवारिश्चाप्रासावयौतांघ्रिश्चा
५८ निद्रयाउपचितचेतोयस्याः ५९ मारोदीरित्सपालयनवलुनात सप्तधाचकर्तचिछेद ६० ६१ ५७

कौशिक इदं गणानां समगणानां वै महत्तराति प्रकृतेः ९२ ९४ सनत्कुमारः सह ९५ ९६ दित्वादिष्कुपटम्पतो
सतिर्द्वेपि विनिष्कुपटमेवाह ९७ लब्धमेतन्नरं येन सर्वैर्बुद्धिर्यस्य नन्नधर्मे ९८ ११ अपि परमोत्तम
मामेवं प्रस्थानतो मसह्यं एयमित्याह कौशिकः अनन्यभागान्या दैत्ताना मनोमहत्तोगणानं ९२ न
ममारदितेर्गर्भेः श्रीनिवासावकं मया वद्गृथाकुशलितत्मो द्वौएय स्तेनयथाभवाव ९३ स
कृटिष्णादिपु सहवंपुरुषोयाति साम्यतो संवत्सरं किं चिह्नं नेदित्वायच्छेरिर्विनः ९४ सज्ज
रिंद्रेणपंचाशद्वैवासैमरुतोभवन् आयेोह्यमात् दोषतेहरिणासोमयाः कृताः ९५ दितिरह
त्वायदहृशोकुमारानलप्रभान् इंद्रेणसहितांदेवीपयंतनूष्यद्दितिंदिता ९६ अथेंद्रमाह्मा
नाहमादित्यानोंभयावहे अपत्यमिछेत्वचिरं व्रतमेतन्महद्वरे ९७ एकः सकल्पितः पुत्रसं
मस्माभवनकथं यदितेविदितंनशक्र सत्यंकथय मासृषा ९८ इंद्र उवाच॥ अव्रतेदेम्व
सितस्यपथायोंगतेोनिकं लब्धांतरोछिदं गर्भमस्यवृद्धिं नेयधर्मवित् ९९ हतोमेसप्तधागर्भे
आसन् सप्तकुमारकाः तेपि वैकैकशोवृक्णाः सप्तधानापि मेद्रिरे १० ततस्त्वत्परमाश्चर्यंवीक्ष्य
व्यवसितं मया महापुरुषपूजायाः सिद्धिःकाप्यानुषंगिणी ११ आराधनंभगवतईहमाना
निराशिषः येवैनेछंत्यपिपरंतेस्वार्थकुशलाः स्मृताः १२ आराध्यात्मप्रदंदेवं स्वात्मानंजग
दीश्वरं कोवृणीतेगुणस्पर्शंबुधः स्यान्नरकेपियत् नदिदंमम दौर्जन्यंबालिशस्यमहीयसि ते
तुमर्हसि मातस्त्वंदिष्ट्यागर्भोमृतोत्थितः १४ श्रीशुक उवाच॥ इंद्रस्तयाभ्यनुज्ञातः शुद्धभावे
नतुष्टया मरुद्भिः सहितोनत्वा जगाम त्रिदिवंप्रभुः १५ एवंतेसर्वमाख्यातं यन्मांत्वं परि
पि १० गुणस्पर्शोविषयभोगं बुधः कोवृणीते यद्यस्मात् ११ महीयसि हे महत्तमे मतः सब उत्थित

ज्ञानविशेषेणानुपपत्तेरनेकरूपेण दर्शितेषु व्रतं तदेव विहितं लोकहिताय हरितोषणं तस्य प्रकारमिति पोषणम् १ मा
र्गशिरोमासि शुक्लपक्षे आदितः प्रतिपदि २ अन्तर्मन्त्र ऋष्टया शुक्ला द्वादशी यस्याः मार्गशुक्लद्वादशीयोन दनाम्र
लंकृतासती पूजयेत् आदौ नावत्रमस्कारमन्त्रानाह त्रिभिः ३ तेनुभ्यं अलेपर्याप्तमेव सर्वेन किंचिदन्यैः
कृत्यमस्ति केवलं तेनुभ्यं नमोस्तु पर्याप्तहेतवः निरपेक्षाय हे पूर्णकाम सहाविभूतिपतये सकलाः

राजोवाच॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितं तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति १॥**श्री**
शुक उवाच॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया आरभेत व्रतमिदं सर्वकामिकमादितः १
२ निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च स्नात्वा शुक्लदती शुक्ले वसीतालंकृताम्बरे ३ पू
जयेत्प्रातराशात्प्राग्भगवन्तं श्रिया सह अलन्ते निरपेक्षाय पूर्णकाम नमोस्तु ते ४ महाविभू
तिपतये नमः सकलसिद्धये यथा त्वं कृपया भूत्या तेजसा महिमौजसा जुष्ट ईश गुणैः सर्वै
स्ततोसि भगवान्विभुः ५ विष्णुपत्नि महामाये महापुरुषलक्षणे प्रीयेथा मे महाभागे लो
कमातर्नमोस्तु ते ६ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महा
विभूतिभिर्बलिमुपहराणीति ७ अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवा
स उपवीतविभूषणगन्धपुष्पधूपदीपोपहाराद्युपचारान्सुसमाहितोपाहरेत् हविःशेषं तु जुहुयाद
नले द्वादशाहुतीः ८ ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ९ श्रियं वि

सिद्धियोगिमायायस्मिन् तस्मै ४ भोईशाय यथा यथावत्त्वं कृपादिभिर्गुणैः अन्येषां सत्यसंकल्पतादि
भिः सर्वैः गुणैस्ततः तस्मात् ५ महापुरुषस्य परमेश्वरस्य वल्लक्षणानि निरपेक्षतादीनि यस्यास्तस्याः
संबोधनं एजामन्त्रमाह ६ अनेनाहरहर्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवी

११ १२ इत्येवं यत्नवर्तिका पुरुषव्यापारो भावनाख्यः क्रिया लौकिकी १३ १४ महापुरुषचेतसाई
श्वरबुद्ध्या उपनमेत् भजेत् पतिं च स्वयं शीलसन् १८ कर्माणि बिभृयात् तत् तदनुकूलो भवेदिति
यः पत्नीदंपत्योर्मध्ये एकतरेणोभयोरपि भवति १९ न विहन्यात् न विछिंद्यात् २० २१ द्वादशा

मणान्पदं रुवह्नमो भक्तिप्रह्वेन चेतसा दूणावारं जपेन्मंत्रं तत्स्तोत्रमुदीरयेत् ११ युवां तु विश्व
स्य विभू जगतः कारणं परं इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया १२ तस्या अधीश्वरः सा
क्षात्त्वमेव पुरुषः परः त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् १३ गुणव्यक्तिरियं देवी व्यंज
को गुणभुग्भवान् त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रियाश्रया १४ नामरूपे भगवती प्रत्ययस्त्वमुपाश्रयः
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ १५ तथा म उत्तमश्लोक सन्तु सत्या महाशिषः इत्य
भिष्टूय वरदं श्रीनिवासं श्रिया सह १६ तन्निःसार्योपहरणं दत्त्वाचमनमर्चयेत् ततः स्तु
वीत स्तोत्रेण भक्तिप्रह्वेण चेतसा यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिं १७ पतिं च परया
भक्त्या महापुरुषचेतसा प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः १८ बिभृयात्सर्वक
र्माणि पत्न्या उच्चावचानि च कृतमेकतरेणापि दंपत्योरुभयोरपि १९ पत्न्यां कुर्यादनर्हा
यां पतिरेतत् समाहितः विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथंचन २० विप्रान् स्त्रियो वीरव
तीः स्रग्गंधबलिमण्डनैः अर्चेदहरहर्भक्त्या देवं नियममास्थितः २१ उद्वास्य देवं स्वे धाम्नि
तन्निवेदितमग्रतः अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा २२ एतेन पूजाविधिना
मासानित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसंख्या पोसन्यां पूर्वे कल्पयागः स्या

शरीरान्याश्री ४

२३

उपचरेत्तउपवसेत् श्वोभूते प्रभाते सति विषयसि शृतेन पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकवि
धानेन ॥२४॥२५॥ सुप्रजास्त्वं सन्तुत्तदमित्यर्थः ॥२६॥२७॥ यः सततं शेषः अवीरा विधवा यथने अवीरा सत्या।
विद्यादुर्भगा सुभगा भवति ॥२८॥ यामयावी रोगी सा विरुजा विशिष्टया रुजा विमुच्यते ॥ इंद्रियैः सहि

श्वोभूते पयउपस्पृश्य कृत्स्नमभ्यर्च्य पूर्ववत् ॥ पयः शृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ पाकयज्ञवि
धानेन द्वादशैवाहुतीः पतिः ॥२४॥ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः ॥ प्रणम्य शि
रसा भक्त्या भुंजीत तदनुज्ञया ॥२५॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः ॥ दद्यात्पत्न्यै चरोः
शेषं सुप्रजास्त्वं सुसौभगं ॥२६॥ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ॥ स्त्री
चैतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहान् ॥२७॥ कन्या च विंदेत समग्रल
क्षणं पतिं त्ववीरा हतकिल्बिषां गतिं ॥ मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपम
ग्र्यं ॥२८॥ विंदेद्विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्यदेहं ॥ एतत्पठन्नभ्युदये च कर्म
ण्यनंततृप्तिः पितृदेवतानां ॥२९॥ तुष्टाः प्रयच्छंति समस्तकामान्होमावसाने हुतभुक् श्रीह
रिश्च ॥ राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥३०॥ इति श्रीभागवते मह
पुराणे षष्ठस्कंधे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः ॥१९॥

तं कल्यं देहं च विंदेदिति शे
षः ॥ पठन्नभ्युदये तत्र स्मापिते पर्वणि दैवाज्ञानां च अनंततृप्तिर्भवतीत्यर्थः ॥२९॥ राजन्निति महत्पुण्यं
जन्म महद्व्रतं च ॥३०॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे भावार्थदीपिकायामेकोनविंशोऽध्यायः ॥